वर्षम्-२

अङ्कः-७,८
संयुक्ताङ्कः

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११-१२ वैक्रमाब्दः २०६६-६७ माघ-कृष्ण १ – आषाढ़-कृष्ण ४ शकः १९३१-३२ जनवरी - जून् २०१०



## कुलपतिवाक्

संस्कृतवार्ताया अयम् अङ्कः संयुक्ताङ्कत्वेन किञ्चिद् विलम्बेन च प्राकाश्यमायाति। अत्र कारणं संस्थानस्य कार्यक्रमाणां बाहुल्यमेव। एतस्माच्च कारणादेव अङ्कस्यास्य आकारो वृद्धिं गतः। विदन्त्येव विज्ञा यत् संस्कृतभाषा, तदीया साहित्यपरम्परा तत्संवलिता च प्रज्ञा अनेकसहस्रवर्षेभ्यः स्वीयां विकासयात्रां क्रममाणा आस्ते। अस्यां च विकासयात्रायां समागताः नैकाः उत्थानपतनावसराः। इयं भाषा, इयं परम्परा इयं च प्रज्ञा आत्मानं प्रतियुगं नवीनरूपेषु आविर्भावयति। यथा अग्निविहगः मृत्वाऽपि आत्मनो भस्मावशेषेभ्यः स्वात्मानं पुनर्जनयति तथैव चिरपुरातनीनां सनातनीनां संस्कृतभाषा-परम्परा-प्रज्ञानां पुनर्जन्म प्रतियुगं जायते। तद्यथोक्तमन्यत्र मया –

**उन्मेषं नवमेव या प्रतियुगं व्यानक् विकासान्वितं**
**प्राचीनं परिरक्ष्य शास्त्रनिचयं नव्येन संयोज्य तत्।**
**भव्यं भारतवर्षवैभवमहो सारं च सारस्वतं**
**ज्योतिः प्रातिभमुज्जवलं च सकलं सन्दर्शयन्ती शिवम्॥**
**दग्ध्वाऽऽत्मानमसौ हि वह्निविहगो भस्मावशेषात् पुनः**
**नव्यं जन्म समश्नुते समधिकं सञ्जायते प्राणवान्।**
**प्रत्येकं च युगे तथैव सहजं कालाध्वरे संस्कृता**
**हुत्वाऽऽत्मानमियं नवैव नितरां जाता पुनर्जायते॥**

अभूतपूर्वः खल्वयं संस्कृतस्य पुनरुन्मेषकाल इति मन्यामहे। आधुनिके अस्मिन् समये अपूर्वैव समृद्धिर्दरीदृश्यते एतासां संस्कृतभाषा-परम्परा-प्रज्ञानाम्। राष्ट्रियसंस्कृतसंस्थानमपि एतासां संस्कृतभाषा-परम्परा-प्रज्ञानां पुनराविर्भावे नवोन्मेषे समुल्लासे वा निमित्तभूतम्। विगतयोर्वर्षयोरस्य संस्थानस्य कार्यक्रमाः गतिविधयो वा प्रगुणिता इति हर्षप्रकर्षमनुभवामः। एतेषु कार्यक्रमेषु गतिविधिषु वा पूर्वोत्तरराज्येषु ऐदम्प्राथम्येन पदक्षेपः, सिक्किमप्रदेशस्य राजधान्यां गेङ्टोकनगर्याम् 'पूर्वोत्तरराज्यानां संस्कृतेऽवदान'मिति विषयमवलम्ब्य राष्ट्रिया सङ्गोष्ठी, मणिपुरराज्ये निकषा इम्फालनगरं नाम्बोलग्रामे राधामाधवसंस्कृतमहाविद्यालयस्य आदर्शमहाविद्यालयत्वेन अङ्गीकारः, त्रिपुराराज्ये अगरतलापुर्यां अखिलभारतीयसंस्कृतनाट्यमहोत्सवस्य आयोजनम् इत्यादयः पूर्वं सूचिताः। अस्मात् शैक्षणिकसत्रात् दूरस्थशिक्षापद्धत्या अपि प्राक्शास्त्रि-शास्त्र्याचार्य-कक्षाणामध्यापनम् आरभ्यते, तेन संस्कृतशिक्षायाः सार्वत्रिकप्रसारः सुकरः स्यात्। तथैव भोपालनगरे गरलीपुर्यां च नवीनपरिसराणां निर्माणेन छात्राणां कृते सौविध्यस्य विस्तारो विधीयते। आगामिनि वर्षे विश्वसंस्कृतपुस्तकमेलाया आयोजनेन संस्कृत-साहित्यस्य नूतनता भव्यता च संसारस्य पुर आविर्भविष्यतीति विश्वसिमः। एवंविधेषु संस्कृताभ्युदयाय क्रियमाणेषु नूतनपदक्षेपेषु समस्तः संस्कृतज्ञसमाजः एककुटुम्बतया ऐकात्म्यं प्रकटीकरोति, सन्ति च नाना संस्थाः अत्र सहयोगं कुर्वाणा इति निश्चप्रचमस्माकमास्थानां विश्वासानां प्ररोहाय पल्लवनाय सुखकरी स्थितिरिति सामोदं श्रावणीपूर्णिमायामायोज्यमानस्य आगामिनः संस्कृतसप्ताहमहोत्सवस्य कृते सर्वेभ्यः शुभकामनां वितरति

*–राधावल्लभः त्रिपाठी*



अ.भा.सं. नाट्योत्सवस्य उद्घाटनोत्सवे त्रिपुरा-राज्यपालं ज्ञा. यशवन्तरावपाटीलं सत्कुर्वन् कुलपतिः रा.व. त्रिपाठी, श्रीमती य.पाटील्, त्रिपुरा वि.वि. कुलपतिः अरुणोदयसाहः च दृश्येते



गुरुवायूर्-परिसरस्य शतमानोत्सवे रा.व. त्रिपाठिवर्यं, राजशेखरन् पिल्लैवर्यं च स्वागतीकुर्वत्यः छात्र्यः



पालिकेन्द्रस्य उद्घाटनं कुर्वन् उ.प्र. राज्यपालः बि.एल्. जोशी। कुलपतिः रा.व.त्रिपाठी, अनीताभटनागरजैनः च दृश्येते

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः रामानुजदेवनाथः, नवदेहली
प्रा. जि. गङ्गन्ना, पुरी
प्रा. विश्वमूर्तिशास्त्री, जम्मू
प्रा. सुरेन्द्रझाः, इलाहाबादम्
प्रा. आजादमिश्रः, भोपालम्
प्रा. प्रकाशपाण्डेयः, गरली
प्रा. के.टी. माधवन्, गुरुवायूरु
प्रा. अर्कनाथचौधरी, जयपुरम्
प्रा. ए.पि. सच्चिदानन्दः, शृङ्गेरी
प्रा. एम्.ए. बाबुः, मुम्बई
प्रा. सर्वनारायणझाः, लखनऊ

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी
डॉ. रत्नमोहनझाः
कू. वेङ्कटेशमूर्तिः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

**संस्कृतवार्ता**
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
ISSN : 975

प्रकाशकः
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिवार्ता



'संस्कृतवार्ता' सुसम्पन्ना दृश्यते सर्वथा शुभा।
अहो मे हृदि वार्धक्ये आशा बलवती स्थिता॥

आद्याचरणझाः, पटना

'संस्कृतवार्ता' सातत्येन प्राप्यते मया। तदर्थमहमनुगृहीतोऽस्मि। संस्कृत-विषयकाणामुपक्रमाणां ज्ञानेन मम मनः तुष्यति।

गणेश-उमाकान्त-थिटे
भाण्डारकर-प्राच्यविद्यासंशोधनमन्दिरम्, पुणे-४११००४

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिक्याः संस्कृतवार्तायाः अध्ययनेनावगतं यत् काले काले संस्थानं विविधान् कार्यक्रमान् आयोजयति।

डा. सुदेशगौतमः, हि.आ.सं.म.वि., जाङ्गला (हि.प्र.)

## ऐषमः शैक्षिकसत्रात् सत्रार्ध-परीक्षापद्धतिः आरभ्यते

२०१०-२०११-तमात् शैक्षिकसत्रात्, नियमितप्रणाल्यां **संस्थानपरिसरेषु अधीयानानां शास्त्रिच्छात्राणाम् आचार्यच्छात्राणां च कृते** सत्रार्धपरीक्षा (सेमिष्टर)-पद्धतिः क्रियान्विता भविष्यति। अनया पद्धत्या वर्षे द्विवारं (प्रथमसत्रार्धपरीक्षा, द्वितीय-सत्रार्धपरीक्षा चेति) परीक्षा भविष्यति। संस्थानपरिसरादन्यत्र आदर्शसंस्कृतमहाविद्यालया-दिषु पठतां छात्राणां कृते तु यथापूर्वं वार्षिकपरीक्षापद्धतिः अनुवर्तते। प्रकृतशैक्षिकसत्रे परिसरीयशास्त्रिप्रथमवर्षच्छात्राणाम्, आचार्यप्रथमवर्षच्छात्राणां च कृते एव एषा सत्रार्धपरीक्षाप्रणाली अन्विता भविष्यति।

## प्राच्यविद्यासम्मेलने संस्थानस्य प्रातिनिध्यम्

तिरुपतौ जूनमासे रा.सं. विद्यापीठे प्रवृत्ते ४५तमे अ.भा. प्राच्यविद्यासम्मेलने सम्पन्ना पण्डितपरिषत् रा.सं. संस्थानेन प्रायोजिता आसीत्। गतजूनमासस्य तृतीयचतुर्थदिनाङ्कयोः प्रवृत्तायाम् अस्यां परिषदि राष्ट्रस्तरीयाः उपपञ्चाशत् विद्वांसः शास्त्रचर्चाम् अकुर्वन्। संस्थानकुलपतिना राधावल्लभत्रिपाठिवर्येण समुद्घाटिते एतस्मिन् कार्यक्रमे म.म.एन्.एस्. रा. ताताचार्यमहोदयः, म.म.पु. श्रीरामचन्द्रुडुमहोदयः च मुख्यातिथि-सम्मानितातिथी आस्ताम्। आचार्यः का.इ. देवनाथवर्यः परिषदः सदः समचालयत्। भविष्यति पण्डितपरिषदः अधिवेशनानां सुचारुसञ्चालनाय परामर्शसङ्कलनाय संस्थानकुलपतिना चतुर्णां सदस्यानां (आचार्याणां प्रह्लादाचार्य-सरोजाभाटे-का.ई. देवनाथ-रामानुजदेवनाथानां) समितिरेका घटिता। ऐषमः पण्डितपरिषदि गृहीतभागाः विद्वद्वरेण्याः इमे – रहसविहारीद्विवेदी, प्रह्लादाचार्यः, रामाशीषपाण्डेयः, रामानुजदेवनाथः, आजादमिश्रः, उमारमणझाः, अर्कनाथचौधरी, रामलालशर्मा, रा.ल.न. शास्त्री, नवीनहोल्लः, हरिनारायणतिवारी, ब्रजभूषण-ओझा, के.गणपतिभट्टः, श्रीधरन्, अनन्तः, जयशङ्करझाः, गणपतिभट्टः, आञ्जनेयशर्मा, आर्.आर्. सोमयाजुलुः, अशोकचन्द्रगौडशास्त्री, वसन्तगाडगील:, विश्वनाथशर्मा, महेश्वरन्, टी.एस्.आर्. नारायणन्, पुष्पादीक्षिता, सूर्यनारायणभट्टः, बालाजी, नवीनः, भागीरथीनन्दः, नागसम्पिगे, शिवरामभट्टः, सुकान्तकुमारसेनापतिः, का.ई. देवनाथः, कल्याणशास्त्री, देवन्, दयानाथः च।

## प्रबन्धमण्डलं पुनर्घटितम्

रा.सं.संस्थानस्य प्रबन्धमण्डलं पुनर्घटितम्।

तच्च इत्थमस्ति–

| | | |
|---|---|---|
| कुलपतिः आचार्यः राधावल्लभत्रिपाठी | – | अध्यक्षः |
| आचार्यः लोकेशचन्द्रः<br>राष्ट्रपतिपुरस्कारपुरस्कृतः विद्वान्<br>भूतपूर्वः लोकसभासदस्यश्च | – | सदस्यः |
| आचार्यः डि. प्रह्लादाचार्यः<br>कुलपतिचरः, रा.सं.वि. तिरुपतिः | – | सदस्यः |
| श्री ओ.पी. आचार्यः<br>निदेशकः, आ.नि.स्मृ.सं.शि.शो.सं. कोलकाता | – | सदस्यः |
| आचार्या सरोजा भाटे<br>भूतपूर्वसचिवा, भा.प्रा.वि.शो.सं., पुणे | – | सदस्यः |
| वित्तपरामर्शदः<br>मा.सं.वि.म. भारतशासनम् | – | सदस्यः |
| निदेशकः (भाषाणाम्)<br>मा.सं.वि.म., भारतशासनम् | – | सदस्यः |
| डा. जी. गङ्गन्ना<br>प्राचार्यः, सदाशिवपरिसरः, पुरी | – | सदस्यः |
| आचार्यः, रा.ना. दासः (गरली) | – | सदस्यः |
| डा. एस्.राधा (मुम्बई)<br>उपाचार्या | – | सदस्या |
| डा. के. सरलादेवी (गुरुवायूरु)<br>व. सहायकाचार्या | – | सदस्या |
| आचार्यः रामानुजदेवनाथः<br>कुलसचिवः, रा.सं.सं. | – | सचिवः |

प्रबन्धमण्डलमिदं वर्षत्रयं यावत् प्रभावि भविष्यति।

laLÑrxzUFkiz.kf;uka Ñrs eksndjh okrkZ

## भविष्यति विश्व-संस्कृत-पुस्तकमेला

बह्वीनां संस्कृतसंस्थानां संयुक्तप्रयासेन २०११-वर्षस्य जनवरी-सप्तमदिनाङ्कात् दशमदिनाङ्कं यावत् बेङ्गलूरुनगरे विश्वसंस्कृत-पुस्तकमेला भविष्यति। एतस्य कार्यक्रमस्य आयोजकसंस्थासु-राष्ट्रियसंस्कृतसंस्थानम्, कर्णाटकशासनम्, संस्कृतविश्व-विद्यालयाः, संस्कृतपरिषदः/अकादम्यः, अखिलभारतीयसंस्कृत-पुस्तक-प्रकाशकसङ्घः, संस्कृत-संवर्धनसमितिः, राष्ट्रिय-पाण्डुलिपिमिशन्, संस्कृतभारती-इत्येताः अन्तर्भवन्ति। एतस्मिन्नवसरे पञ्चशताधिकानां संस्कृतग्रन्थानां लोकार्पणं, संस्कृतग्रन्थप्रकाशकानां ग्रन्थविक्रयकेन्द्राणि, विभिन्नाः संस्कृतनिष्ठसांस्कृतिककार्यक्रमाः, विद्वद्गोष्ठ्यादिकं च तत्र भवेयुः। संस्कृतविद्यालयेषु, महाविद्यालयेषु विश्वविद्यालयेषु च संस्कृतम् अधीयानाः, अनुसन्धातारः, अध्यापकाश्च शैक्षिकयात्रया तत्र गच्छेयुः, सम्मिलेयुः।

रा.सं. संस्थानेन सञ्चाल्यमानाः अखिलभारतीयशास्त्रीय-स्पर्धाः शलाकापरीक्षाः च ऐषमः शैक्षिकवर्षे विश्वसंस्कृत-पुस्तकमेलायाः अवसरे एव भवेयुः। एका विशिष्टा पण्डितपरिषद् अपि पुस्तकमेलाङ्गतया आयोजिता भविष्यति।

ऐतिहासिकी इयं विश्वसंस्कृतपुस्तकमेला संस्कृतज्ञेषु, संस्कृतग्रन्थप्रणयिषु, संस्कृताभिमानिषु च नूतनमुत्साहं पूरयेदिति आशास्महे।

मुख्यालयवार्ता

## भोपालपरिसरस्य नूतनभवनं स्वायत्तमभूत्

केन्द्रीय-लोक-निर्माण-विभागद्वारा नूतनतया निर्मितं भोपालपरिसरभवनं रा.सं.संस्थानस्य हस्तगतमभूत्। सम्प्रति भोपालपरिसरीयक्रियाकलापाः नूतनभवने सम्पद्यन्ते। सम्प्रति भोपालपरिसरस्य पत्राचारसङ्केतः, दूरभाषासंख्यादिकं च इत्थमस्ति-

**राष्ट्रियसंस्कृतसंस्थानम्**

बागसेवनिया, संस्कृतमार्गः भोपालम्,

दूरभाषा : ०७५५-२४१८०४३



## विकासः-संस्कृतश्रियः

पद्मश्रिया मण्डिताः – आचार्यः रमारञ्जनः, आचार्यः गोविन्दचन्द्रपाण्डेयः, आचार्यः शैल्डान्-पोलाकः।

पद्मभूषणभूषितः – आचार्यः सत्यव्रतः

सद्भावनाभावितः – डा० मो० हनीफखानः




पुरस्कारभाजो: हनीफखानशास्त्रि-सत्यव्रतशास्त्रिणो: अभिनन्दनं कुर्वन्तौ श्रीनिवासरथः, राधावल्लभत्रिपाठी च

### विद्वदभिनन्दनसमारोहः

परमप्रमोदकरी इयं वार्ता यत् भारतशासनेन गत-गणतन्त्रदिनोत्सवस्य अवसरे चत्वारः संस्कृतज्ञाः पद्मपुरस्कारैः अपरश्चैकः सद्भावनापुरस्कारेण सम्मानिताः। (१) वरेण्यो विद्वन्मनीषी सारस्वतसाधक आचार्यः गोविन्दचन्द्रपाण्डेयः, (२) तिरुपतिस्थराष्ट्रियसंस्कृत-विद्यापीठस्य कुलाधिपतिचरः आचार्यः रमारञ्जनमुखर्जीमहोदयः (३) वैदेशिकः संस्कृतज्ञः आचार्यः शेल्डान्-पोलाकः च **'पद्मश्रीः'** इति विरुदेन, (४) प्राप्तज्ञानपीठपुरस्कारः आचार्यः सत्यव्रतशास्त्री **पद्मभूषण** इति विरुदेन, रा.सं. संस्थाने शोधसहायकपदे कार्यरतः डा. मोहम्मदहनीफखानः **राष्ट्रिय-साम्प्रदायिकता- सद्भावना**पुरस्कारेण च समलङ्कृताः अभूवन्। संस्कृतकुलकीर्तिं समेधयताम् एतेषाम् अभिनन्दनाय २९-१-२०१०तमे दिनाङ्के रा.सं.संस्थानस्य कुलपतेः राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये संस्थानमुख्यालये एकः कार्यक्रमः समायोजितः आसीत्। कुलपतिः श्रीफलोत्तरीयस्मृतिचिह्नैः एतान् अभिनन्द्य तैः विद्वद्भिः अध्यापन-प्रबोधन-ग्रन्थलेखनादिकर्मभिः कृतां संस्कृतसेवां भृशं प्राशंसत्। तेभ्यः महानुभावेभ्यः भारतशासनेन प्रदत्ताः इमे पुरस्काराः संस्कृतमात्रे समर्पितस्य आदरस्य द्योतकाः, समग्रस्य संस्कृतसमाजस्य गौरवस्य कारणम् इति च कुलपतिः राधावल्लभ-त्रिपाठिमहोदयः अवर्णयत्। संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः, शास्त्रचूडामणिः विद्वान् डा. रमाकान्तशुक्लः, डा. रामदेवझाः च प्रशस्तिपत्रवाचनपुरस्सरं विदुषां तत्कृतसंस्कृतसेवाकर्मणां च परिचयम् अकारयन्। सम्मानोत्तरं भाषमाणः आचार्यः सत्यव्रतशास्त्रिवर्यः न्यगादीत् यत् 'संस्कृतक्षेत्रे करणीयानि कार्याणि बहून्यवशिष्टानि वर्तन्ते। यत्किञ्चित् कृतम्, अग्रेऽपि आजीवनं यथाशक्ति संस्कृतसाहित्यसेवायां निरतो भविष्यामि' इति। डा. हनीफखानः संस्कृतग्रन्थेषु इस्लामीसाहित्ये च तेनावलोकिततत्त्वसाम्यम् उदाहृत्य तद्विषये स्वयं कृतकार्यं विवृतवान्। अवसरेऽस्मिन् भारतशासनस्य मा.सं.वि.मन्त्रालयस्य संयुक्तसचिवा (भाषायाः) डा. अनीताभटनागरजैन-महोदया, सुप्रसिद्धः संस्कृतकविः म.सा.वे.वि. प्रतिष्ठानस्य उपाध्यक्षः आचार्यः श्रीनिवासरथः, आचार्यः इन्द्रनाथचौधरी, डा. गौतमभाईपटेलः, डा. लालगोपालशर्मा, संस्थानमुख्यालयसदस्याश्च समुपस्थिताः आसन्।



अभिनन्दनोत्तरं भाषमाणः रमारञ्जनमुखर्जी, समुपस्थिता डा. अनीता भटनागरजैन्, राधावल्लभत्रिपाठी च

### ब्राडबेकमहोदयस्य व्याख्यानम्

संस्थानमुख्यालये १५-०१-२०१०तमे दिनाङ्के कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये अमेरिकादेशस्य संस्कृतविदुषः आचार्यस्य साइमन्-ब्राडबेकस्य व्याख्यानम् अभवत्। पुराणेषु, महाकाव्येषु च कृतभूरिपरिश्रमः साइमन्महोदयः विदेशेषु पुराणविषये, संस्कृताध्ययनविषये च तत्रत्यविद्वत्समाजस्य दृष्टिः का विद्यते इति विवृतवान्। इङ्ग्लैण्डदेशे संस्कृताध्ययनदिशोऽपि तेन विशदीकृताः।



ब्राडबेकमहोदयं सम्मानयम् कुलपतिः

### राष्ट्रस्य ईशान्य-भागेऽपि भविष्यति संस्थानपरिसरः

भारतस्य पूर्वोत्तरभागे विद्यमाने त्रिपुरा-राज्ये राष्ट्रियसंस्कृतसंस्थानस्य एकः परिसरः भवेदिति सम्भाव्यते। त्रिपुराराज्यशासनेन राज्यराजधान्याम् अगरतलायां संस्थानपरिसराय भूमिं प्रदातुम् इच्छा प्रकटिता।

## कुलपतिः सम्मानितः



कुलपतिवर्याय महर्षि-वेदव्यासपुरस्कारं प्रददती श्रीमती पुरन्धेश्वरी

- राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः तत्कृत-संस्कृतसाहित्यसेवामुपलक्ष्य १९-६-२०१०तमे दिनाङ्के भोपाले समन्वयभवने प्रवृत्ते श्री-श्री-जयेन्द्रसरस्वतीस्वामिनां ७५तमे अवतारमहोत्सवे मध्यप्रदेशस्य महामहिमराज्यपालस्य श्रीरामेश्वरठाकुरवर्यस्य करकमलाभ्यां **संस्कृतभाषासेवारत्नम्** इति पुरस्कारेण सम्मानितः अभवत्। एतस्मिन्नवसरे वेदे, साहित्ये, सङ्गीते, समाजसेवायां च कृतभूरिपरिश्रमेभ्यः पुरस्कारप्रदानं कृतम्। कार्यक्रमोऽयं श्री-श्री-जयेन्द्र-सरस्वतीस्वामिपादानां दिव्यसान्निध्ये मध्यप्रदेशस्य महामहिमशालिनः राज्यपालस्य श्री-रामेश्वरठाकुरमहोदयस्य अधिष्ठातृत्वे च सम्पन्नः। पुरस्कारभाजं अस्मत्कुलपतिवर्यम् अभिनन्दामः।
- विश्वविद्यालय-अनुदान-आयोगेन प्रदत्तेन प्रतिष्ठावहेन **महर्षिवेदव्यासपुरस्कारेण** कुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः सम्मानितः। नवदेहल्यां दिनाङ्के २१.२.२०१० प्रवृत्ते समारोहे मा.सं.वि. राज्यमन्त्रिवर्या श्रीमती पुरन्धेश्वरी पुरस्कारं प्रदाय कुलपतिमहोदयम् अभिनन्दिनती।

## दूरस्थशिक्षाप्रणाल्या पाठ्यक्रमाः आरप्स्यन्ते

**दूरस्थ-शिक्षासम्बद्धकार्याणाम् अनुष्ठानाय रा.सं. संस्थानेन आरब्धः दूरस्थशिक्षा-निकायः (दूरस्थ-शिक्षानिदेशालयः) 'मुक्तस्वाध्यायपीठम्' इति व्यवह्रियते। एतदङ्गभूतानि अध्ययनकेन्द्राणि (यत्र सम्पर्ककक्षादिकं प्रवर्तेत) स्वाध्यायकेन्द्रनाम्ना व्यपदिश्यन्ते। संस्थानपरिसरेषु तानि स्वाध्यायकेन्द्राणि भविष्यन्ति।**

राष्ट्रियसंस्कृतसंस्थानेन प्राक्शास्त्रि-शास्त्र्याचार्य-कक्षासु व्याकरण-साहित्य-ज्यौतिषविषयेषु, उपाधिपाठ्यक्रमाः, पालि-प्राकृत-नाट्यशास्त्र-पत्रकारतादिविविधविषयेषु प्रमाणपत्रपाठ्य-क्रमाश्च अचिरादेव मुक्तस्वाध्यायपीठमाध्यमेन दूरस्थशिक्षणविधिना प्रारप्स्यन्ते। मुक्तस्वाध्यायपीठस्य नियामिका अभिकल्पसमितिः घटिता। अभिकल्पसमितौ अध्यक्षत्वेन कुलपतिः आचार्यः राधावल्लभत्रिपाठी, सदस्यत्वेन आचार्यः वेम्पटिकुटुम्बशास्त्री (वाराणसी), आचार्यः के.वी. रामकृष्णमाचार्युलुः (तिरुपतिः), आचार्यः रामानुजदेवनाथः (देहली), आचार्या मञ्जुलिका श्रीवास्तवः (नवदेहली), आचार्यः, सी.आर्.के. मूर्तिः (नवदेहली), आचार्यः वी. वेङ्कय्यः (हैदराबाद्), आचार्यः सुबेसिंहः (देहली), डा. जी. गङ्गना (पुरी), आचार्यः रामलखनपाण्डेयः (लखनऊ) च वर्तन्ते। मुक्तस्वाध्यायपीठस्य निदेशकः अभिकल्पसमितौ सदस्यसचिवो भवति। सम्प्रति डा. वाई.एस्. रमेशः, मुक्तस्वाध्यायपीठस्य निदेशकत्वेन कार्यं निर्वहति। मुक्तस्वाध्यायपीठे कार्यरताः इतरे सदस्याः इमे- डा. सच्चिदानन्दतिवारी (उपनिदेशकः), डा. रत्नमोहनझाः (सहायकाचार्यः उपकुलसचिवः (प्र) च), कू. वेङ्कटेशमूर्तिः (सहायकाचार्यः), डा. अजयकुमारमिश्रः (सहायकाचार्यः) डा. राणी दाधीचः (अनुदेशिका) च। मुक्तस्वाध्यायपीठस्यास्य स्वाध्यायकेन्द्रत्वेन मुख्यालयसहितदशपरिसराः कार्यं विधास्यन्ति।




दूरस्थशिक्षापरिषदः निरीक्षणदलं संस्थानस्य क्रियाकलापविषये संसूचयन् कुलपतिः। वामतः गोपीरमणमिश्रः, शारदाशर्मा, शत्रुघ्नकुमारः, रा.व. त्रिपाठी, डी.के. चौधरी सि.आर्.के. मूर्तिः च।

मुक्तस्वाध्यायपीठस्य मार्गदर्शिकानिर्माणार्थं रचितसमित्याः त्रिदिवसीयं प्रथमोपवेशनं ६.४.२०१० तः ८.४.२०१० दिनाङ्क-पर्यन्तं तथा च द्वितीयोपवेशनं २२.४.२०१० तः २४.४.२०१० दिनाङ्कं यावत् संस्थानमुख्यालये समभवत्। उपवेशनेऽस्मिन् डा. नरसिंहरावः, (इ.गा.रा.मु.वि.वि.), डा. वाई.एस्.रमेशः (जयपुरपरिसरः), आ. सुदेशकुमारशर्मा (जयपुरपरिसरः) च समुपस्थिताः आसन्।

अप्रैलमासस्य २७ दिनाङ्के दूरस्थशिक्षापरिषदा मुक्तस्वाध्यायपीठस्य क्रियाकलापानां निरीक्षणं कृतम्। तदनु १३.५.२०१०तमे दिनाङ्के अभिकल्पसमितेः प्रथमोपवेशनं सम्पन्नम्।

## ग्रन्थाः लोकार्पिताः



ग्रन्थलोकार्पणावसरे प्र.कु. राणा, ए.वि. नागसम्पिगे, चन्दनसिंहकन्यालः, श्रीनिवासवरखेडी, राधावल्लभत्रिपाठी, प्रह्लादाचार्यः, नरेशकुमारः, रा.देवनाथः च

फेब्रवरीमासस्य २९तमे दिनाङ्के संस्थानमुख्यालये ग्रन्थलोकार्पण-समारोहः एकः सम्पन्नः। तत्र संस्थानस्य आदर्शशोधसंस्थानैः सज्जीकृतानाम् अधोनिर्दिष्टानां ग्रन्थानां लोकार्पणमभवत्।

- **पूर्णप्रज्ञसंशोधनमन्दिरस्य प्रकाशनानि-**
  उपनिषद्भाष्यम् (नैकापूर्वटिप्पणीसमलङ्कृतम्) भागः-२
  सृष्टिस्वरूपम्
  जगद्गुरु-रेणुकागीतम्
  स्तोत्ररत्नावली
- **संस्कृत-अकादमी हैदराबाद् - इत्यस्य प्रकाशनानि-**
  शोधपत्रिका- The Journal of Sanskrit Academy Vol.9,
  Glimpses into Koutilya's Arthashastra, क्षेमेन्द्रस्य साहित्यसौरभम्



- **चिन्मय-अन्ताराष्ट्रिय-शोधसंस्थायाः प्रकाशनानि-**
  श्रीरामकृष्णचरितम्, पद्मपादचरितम्, स्मार्तप्रायश्चित्तम्, लघुकर्णामृतम्, Logic of Paramarsha.

संस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्ते ग्रन्थलोकार्पणकार्यक्रमे भारतशासनस्य राजभाषाविभागस्य निदेशकः श्रीनरेशकुमारः अतिथिरूपेण समुपस्थितः आसीत्। संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः सभ्यानां स्वागतं व्याहरत्। पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकः डा. नागसम्पिगे, संस्कृत-अकादम्याः निदेशकः डा. श्रीनिवासवरखेडिः, चिन्मय-आदर्शशोधसंस्थायाः निदेशकः प्रतापकुमारः राणा च स्व-स्वसंस्थाभिः प्रकाशितानां ग्रन्थानां परिचयम् अकारयन्। संस्थाने पूर्वं हिन्दीपक्षाङ्गतया आयोजितासु स्पर्धासु विजयिभ्यः संस्थानकर्मचारिभ्यः पुरस्कारप्रदानमपि एतस्मिन् प्रसङ्गे एव सम्पन्नम्। कार्यक्रमे संस्थानस्य मुख्यालयसदस्याः अन्ये च विद्वांसः समुपस्थिताः आसन्। डा. हनीफखानशास्त्री कृतज्ञतावचनानि समार्पयत्।

## पं० गौरीनाथशास्त्रि-स्मृतिव्याख्यानमाला सम्पन्ना

कोलकातायां भारतीयभाषापरिषदः सभागारे २-२-१०तमे दिनाङ्के नवदेहलीस्थ-भारतीय- सूचनाप्रौद्योगिकी-संस्थायाः (IIT) आचार्यः वागीशशुक्लः पं० गौरीनाथशास्त्रि-स्मृतिव्याख्यानमालायाः द्वितीयं व्याख्यानपुष्पं समर्पितवान्। कार्यक्रमोऽयं राष्ट्रियसंस्कृतसंस्थानेन, श्रीसीताराम-आदर्शसंस्कृतमहाविद्यालयेन, भारतीयभाषापरिषदा च सम्भूय समायोजित आसीत्। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी कार्यक्रमस्यास्य अध्यक्षपदं व्यभूषयत्। आरम्भे डा. सुधाकरमिश्रेन मङ्गलाचरणमाचरितम्। भारतीयभाषापरिषदः निदेशकः आ. विजयबहादुरसिंहः समुपस्थितान् विदुषः स्वागतीकृत्य प्राच्यप्रतीच्य-नाट्यपरम्परयोः संक्षिप्तं विश्लेषणं प्रास्तौत्। वागीशशुक्लमहोदयः साहित्यादिशास्त्राणां कस्य पुरुषार्थस्याधिगमे उपयोगिता इति विवरणपुरस्सरं स्वीयं भाषणं प्रारब्धवान्। साहित्यशास्त्रस्य मूलं कामसूत्रमिति स सप्रमाणं स्थापितवान्। भरत-व्यास-कालिदास-बाणभट्टप्रभृतीनां कृतिमारभ्य वात्स्यायनस्य कामसूत्रपर्यन्तं विविधग्रन्थोल्लेखपुरस्सरं स्वमन्तव्यं पुष्टीकुर्वन् सः अवादीत् यत् विभिन्नानि शास्त्राणि भिन्नभिन्नमार्गेण (विविधैः प्रकारैः) मोक्षाख्यं पुरुषार्थं प्राप्तुमुपायान् निर्दिशन्ति इति।




व्याख्यानं वितन्वन् वागीशशुक्लः।
उपविष्टाः सोमेशमिश्रः, रा.व. त्रिपाठी, विजयबहादुरसिंहः च

आ. राधावल्लभत्रिपाठिवर्यः नासदीयसूक्त-बृहदारण्यकोपनिषत्-कामसूत्र-नाट्यशास्त्रादि- ग्रन्थेभ्यः, पी.वी.काणे-राजशेखरप्रभृतीनां ग्रन्थेभ्यश्च प्रमाणानि उद्धृत्य वैदुष्यपूर्णं भाषणमकरोत्। 'अस्माकं पारम्परिकशास्त्राणां वास्तविकः अभिप्रायः अनुसन्धानेन ग्राह्यः। धर्मार्थकामादिशब्दानाम् इङ्गितार्थः आङ्ग्लभाषायाः Religion, sex इत्यादिशब्दैः तुलां नाधिरोहति' इति सः प्रत्यपादयत्। ततोऽग्रे विवृण्वन् सः 'श्रोत्र-त्वक्चक्षु-जिह्वा-घ्राणानाम् आत्मासंयुक्तेन मनसा अधिष्ठानं तेषु तेषु आनुपूर्व्येण प्रवृत्तिः कामः' इति वात्स्यायनोक्तं कामशब्दनिर्वचनं प्रत्यपादयत्।

# विद्यालयस्तरे संस्कृतशिक्षणसमस्याः इति विषयमधिकृत्य राष्ट्रिया सङ्गोष्ठी आयोजिता

विद्यालयेषु संस्कृतशिक्षणविषये (पाठ्यचर्यासन्दर्भे) अनुभूयमानानां समस्यानां विश्लेषणाय तत्परिहारोपायचिन्तनाय च राष्ट्रियसंस्कृतसंस्थानेन राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षणपरिषदः (NCERT) सहयोगेन नवदेहल्यां रा.शै.अ.प्र.प. सभागारे राष्ट्रियसङ्गोष्ठी आयोजिता। फेब्रवरी-मासस्य अष्टमदिनाङ्कात् दशमदिनाङ्कं यावत् प्रवृत्तायाः सङ्गोष्ठ्याः समुद्घाटनं भारतशासनस्य मानवसंसाधनविकासमन्त्रालयस्य संयुक्तसचिवा (भाषा) डा. अनिताभटनागरजैनमहोदया अकरोत्। डा. सुधाराणीपाण्डेया (कुलपतिः, उ.ख. संस्कृतवि.वि. हरिद्वारम्) विशिष्टातिथिरूपेण, रा.शै.अ.प्र. परिषदः निदेशकः आ. कृष्णकुमारः सम्मानितातिथिरूपेण च समुपस्थितौ आस्ताम्। संस्थानस्य कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्तेऽस्मिन् कार्यक्रमे आ. रामजन्मशर्मा (भाषाविभागाध्यक्षः, रा.शै.अ.प्र.प.) स्वागतभाषणमकरोत्। आ. रामानुजदेवनाथः (कुलसचिवः, रा.सं.सं.) अन्ते कृतज्ञतावचनानि न्यवेदयत्। तदनन्तरं दशमदिनाङ्कं यावत् अधोनिर्दिष्टविषयेषु चिन्तनसत्राणि प्रवृत्तानि–

- विभिन्नराज्येषु विद्यालयेषु संस्कृतशिक्षणस्य स्थितिः समस्याः समाधानं च।
- पाठ्यपुस्तक-पाठ्यचर्या-शिक्षणविधीनां गुणस्तरवर्धनम्।
- त्रिभाषासूत्रं संस्कृतं च। संवैधानिकस्थितिः संस्कृतं च।
- पाठशालापद्धतिः आधुनिकशिक्षणपद्धतिश्च।
- संस्कृतशिक्षणपद्धतौ नव्यता, अभिरुचिः, उन्मुखीकरणं च।




सङ्गोष्ठ्याः उद्घाटनावसरे आर्.कृष्णकुमारः, अनीताभटनागर-जैन, रा.व. त्रिपाठी, सुधारानीपाण्डेया, रामानुजदेवनाथः च

अष्टादशराज्येभ्यः आहत्य द्विषष्टिः संस्कृताध्यापकाः तत्र सम्मिलिताः आसन्। विविध-विषयेषु प्रवृत्तेषु सत्रेषु आध्यक्ष्यं निर्वाह्य चर्चां चिन्तनं च प्रवर्तयितुं च इमे संस्कृतशिक्षाविदः सङ्गोष्ठ्यां विशेषतः समामन्त्रिता अभूवन् – आ. श्रीधरवसिष्ठः (देहली), आचार्यः पेरिसुब्बरायन्, आ० रविशङ्करमेनोन् (तिरुपतिः), आ० वेदकुमारी घई (जम्मू), आ० च.ल.ना. शर्मा, (गुरुवायूररु), आ० सुदेशकुमारशर्मा (जयपुरम्), डा. वाई.एस्. रमेशः (जयपुरम्), आ.सन्तोषमित्तल् (जयपुरम्), डा. नोदनाथमिश्रः (देहली), डा. आर्.बालाजी (शृङ्गेरी), डा. श्रीकृष्णशर्मा (कुरुक्षेत्रम्), श्री वाचस्पतिमैथानी (देहरादून्), डा. सञ्जयझाः (देहली), डा. कृष्णचन्द्रत्रिपाठी (देहली) तथा च डा. निलिम्पत्रिपाठी (भोपालम्)। १०-२-१०तमे दिनाङ्के सङ्गोष्ठ्यां सम्पूर्तिसमारोहे भाषमाणः श्री चमूकृष्णशास्त्री संस्कृतशिक्षणसम्बद्धानां बहूनां अंशानां विश्लेषणपूर्वकं संस्कृतशिक्षकाणां साम्प्रतिकम् उत्तरदायित्वं निरूपितवान्। संस्कृतशिक्षणनीतिः, पदानि, शिक्षणपद्धतिः, पाठ्यपुस्तकस्वरूपम्, शिक्षकप्रशिक्षणम्, मूल्याङ्कनपद्धतिः, प्रोत्साहकपरिवेशः छात्रसाहित्यम्, शिक्षणसामग्री, विद्यालयस्तरस्य संस्कृतशिक्षणव्यवस्थां संवर्धयितुं नियन्त्रयितुं च राष्ट्रियसंस्कृतपरिषदः घटनम्-इत्यादिविषयबिन्दूनाश्रित्य सः स्वविचारान् उपन्यस्तवान्। कार्यक्रमस्य अध्यक्षः आ. राधावल्लभत्रिपाठिमहोदयः 'संस्कृतशिक्षकाणां व्यवहारोऽपि संस्कृतशिक्षणक्षेत्रं प्रभावयति, संस्कृतशिक्षकाः छात्रान् वात्सल्येन प्रबोधयेयुः, शिक्षणपद्धतौ नवाचारमानीय संस्कृतशिक्षणं छात्रप्रियं कुर्युः' इति शिक्षकान् समबोधयत्। संस्कृतशिक्षकैः सम्भूय विचिन्त्य संस्कृतशिक्षणनीतिः रचनीया। संस्कृतशिक्षकाणां प्रशिक्षणाय रा.सं.संस्थानं सन्नद्धमस्तीत्यपि तेनोक्तम्। संस्कृतवार्तायाः षष्ठाङ्कः एतस्मिन् कार्यक्रमे लोकायार्पितः अभवत्।

सम्पूर्तिसमारोहस्य आरम्भे स्वागतवाचः व्याहृत्य संस्थानकुलसचिवः आ.रामानुजदेवनाथः शिक्षणे सहज-प्रत्यक्षपद्धतिः आप्राचीनकालादेव आसीदिति उपनिषत्साहित्यमुदाहृत्य न्यरूपयत्। तादृशवाङ्मयमालोड्य अनुसन्धानं कृत्वा छात्रस्तरं मनसि निधाय शिक्षणप्रणाली परिष्करणीया इत्यपि तेन अभिप्रायः प्राकाशि। अन्ते रा.शै.अ.प्र. परिषदः भाषाविभागाध्यक्षः आ. रामजन्मशर्मा कार्यक्रमस्य सफलतायै विहितश्रमानभिनन्द्य संस्कृतशिक्षणविषये स्वीयं सदाशयं प्रकटितवान्। रा.शै.अ.प्र. परिषत्पक्षतः संस्कृतविषये यथोचितं विचिन्त्य अग्रे निर्णयाः करिष्यन्ते इत्यवदत्। डा. रत्नमोहनझाः समारोपसत्रे सभां समचालयत्।

एतस्मिन् एव अवसरे प्राचीनसंस्कृतग्रन्थेषु वर्णितानां वैज्ञानिकविषयाणां प्रदर्शनाय 'संस्कृतविज्ञानवैभवम्' इति नाम्ना काचित् प्रदर्शिनी अपि तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठेन आ.जि.एस्.आर्. कृष्णमूर्तिमहोदयस्य निरीक्षणे समायोजिता आसीत्। डा. रणजित्-बेहरा (रा.शै.अ.प्र. परिषद्) एवं डा. शुक्लामुखर्जी (परियोजनाधिकारी, रा.सं.सं.) च दिनत्रयात्मिकायाः सङ्गोष्ठ्याः संयोजनम् अकुरुताम्।

## कविभास्करी

### द्वितीयः अखिलभारतीयः संस्कृतकविसमवायः सम्पन्नः




कविसमवाये श्रीनिवासरथमहोदयस्य कवितां श्रृण्वन्तः शिवजी-उपाध्यायः, रा.व. त्रिपाठी, अभिराजराजेन्द्रमिश्रः च

रा.सं. संस्थानेन ९-२-१०तमे दिनाङ्के नवदेहल्यां राष्ट्रिय-शैक्षिक-अनुसन्धान एवं प्रशिक्षणपरिषद् (NCERT) इत्यत्र द्वितीयः अखिलभारतीयः संस्कृतकविसमवायः 'कविभास्करी' समायोज्यत। संस्कृतक्षेत्रे ख्यातनाम्नः दिवङ्गतकवेः भास्कराचार्यत्रिपाठिवर्यस्य स्मृतौ प्रथमः अ.भा.संस्कृतकविसमवायः गतवर्षे देहल्यामायोजित आसीत्। ऐषमः द्वितीये कविसमवाये आचार्यः श्रीनिवासरथः (उपाध्यक्षः, महर्षि-सान्दीपनीवेदविद्या- प्रतिष्ठानम्, उज्जयिनी)मुख्यातिथिरूपेण, आचार्यः अभिराजराजेन्द्रमिश्रः (कुलपतिचरः, सम्पू.सं.वि.वि. वाराणसी) सम्मानितातिथिरूपेण उपस्थाय कार्यक्रमं सुशोभितवन्तौ। संस्थानस्य कुलपतिवर्यस्य आचार्यराधावल्लभत्रिपाठिनः अध्यक्षतायां प्रवृत्ते एतस्मिन् कार्यक्रमे सप्तदश कवयः स्वीयं काव्यपाठमकुर्वन्। कवितां पठितवन्तः कवयः- आ. श्रीनिवासरथः (उज्जयिनी), आ.शिवजी उपाध्यायः, (वाराणसी), आ. राधावल्लभत्रिपाठी (देहली), आ. राजेन्द्रमिश्रः (शिमला), आ. हरिराम आचार्यः (जयपुरम्), पं. कलानाथशास्त्री (जयपुरम्), आ. वेदकुमारी घई (जम्मू), आचार्यः रामानुजदेवनाथः (देहली), आ. हर्षदेवमाधवः (अहमदाबाद्), आ. रमेशकुमारपाण्डेयः (देहली), आ. इच्छारामद्विवेदी (देहली), डा. रमाकान्तशुक्लः (देहली), डा. रामकुमारशर्मा (गरली), डा. रामलखनपाण्डेयः (लखनऊ), डा. वनमाली बिस्वालः (इलाहाबाद्), डा. सतीशकपूरः (जम्मू), डा. सुज्ञानकुमारमोहान्तिः (भोपालम्) च। एतस्मिन्नवसरे **जयपुरवैभवम्, गोविन्दवैभवम्, साहित्यवैभवम् भागः १ एवं भागः २** [(मञ्जुनाथग्रन्थावल्याः प्रथमभागः) ले. मथुरानाथशास्त्री, सम्पादकौ-देवर्षिकलानाथशास्त्री, डा रमाकान्तपाण्डेयः च] इतीमे ग्रन्थाः प्रकाशिताः।

### ई-ग्रन्थनिर्माणविषये उपवेशनम्

२३-३-२०१०तमे दिनाङ्के संस्थानमुख्यालये कुलसचिवस्य आचार्यरामानुजदेवनाथस्य आध्यक्ष्ये इलेक्ट्रोनिक-ग्रन्थनिर्माणकार्यस्य प्रगतिसमीक्षणाय उपवेशनमेकं सम्पन्नम्। तत्र संस्थानस्य परिसरेषु विदुषां सहयोगेन प्रवर्त्यमानायाः ई-ग्रन्थपरियोजनायाः गतिं संवर्धयितुम् उपायाश्चिन्तिताः।

### 'वाङ्मयी' भाषानुशीलनकेन्द्रम्

६-४-२०१०तमे दिनाङ्के संस्थानमुख्यालये 'वाङ्मयी'-इत्यस्य भाषानुशीलन-केन्द्रस्य उद्घाटनमभूत्। पश्चिमदिल्ली-लोकसभासदस्यः श्रीमान् महाबलमिश्रः भाषानुशीलनकेन्द्रमिदं समुद्घाट्य रा.सं.संस्थानस्य विकासाय सर्वविधं साहाय्यं यथाशक्ति विधास्यते इति प्रतिज्ञातवान्।




वाङ्मय्याः उद्घाटनसभायां भाषमाणः कुलपतिः




वाङ्मयी-इत्यस्य केन्द्रस्य शुभारम्भं कुर्वन् श्री-महाबलमिश्रः

### मुम्बई-परिसरस्य भवननिमित्तं शिलान्यासः भविष्यति

मुम्बय्यां सम्प्रति के.जे. सोमैया-विद्यासंस्थानां भवने रा.सं.संस्थानस्य परिसरः 'क.जे. सोमैया-केन्द्रीय-संस्कृतविद्यापीठम्' प्रवर्तते। एतस्य परिसरस्य स्वीयभवननिमित्तं शिलान्यासः ऐषमः सप्तम्बरमासस्य नवमदिनाङ्के भविष्यति। आचार्यस्य राधावल्लभत्रिपाठिवर्यस्य कौलपत्ये, संस्थानस्य कुलाधिपतिः केन्द्रीय-मा.सं.वि. मन्त्री श्री कपिलसिब्बलमहोदयः शिलान्यासं करिष्यति।

सम्पन्नः

# द्वितीयः अखिलभारतसंस्कृतनाट्योत्सवः



राष्ट्रियसंस्कृतसंस्थानेन गतवर्षे इव अस्मिन्नपि वर्षे अखिलभारत-संस्कृतनाट्योत्सवः समायोजितः। भगवत्याः त्रिपुरसुन्दर्याः सानिध्ये अगरतलानगरे सुकान्त-अकादम्याः प्रेक्षागृहे १५ तः १७ फरवरी २०१० पर्यन्तम् अनुष्ठितस्य नाट्योत्सवस्यास्य उद्घाटनं त्रिपुराराज्यस्य महामहिम-राज्यपालः पद्मश्रीः ज्ञानदेवयशवन्तरावपाटीलवर्यः अकरोत्। सन्दर्भेऽस्मिन् महामहिमशालिना उक्तं यत् भारतशासनेन संस्कृतविकासार्थं महद्दायित्वं रा.सं. संस्थानाय प्रदत्तं वर्तते। अतः त्रिपुराराज्ये अपि संस्कृतस्य संवर्धनार्थं संस्थानेन अग्रे आगन्तव्यम्। एतदर्थम् अपेक्षितं साहाय्यं त्रिपुराशासनेन अवश्यं विधास्यते।

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यराधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्ते कार्यक्रमेऽस्मिन् त्रिपुराविश्वविद्यालयस्य कुलपतिः आचार्यः अरुणोदय-साहः सारस्वतातिथेः पदम् अलमकरोत्। त्रिदिवसीयनाट्योत्सवे सुदूरदेशेभ्यः कलाकाराः समागत्य स्वीयां प्रतिभां प्रकटितवन्तः। भव्यतया प्रवृत्तस्य उद्घाटनसत्रस्य समनन्तरमेव संस्थानस्य शृङ्गेरीपरिसरच्छात्रैः **अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य** हृदयाकर्षकं प्रदर्शनं कृतम्। अगरतलानगरस्य कलाकाराः अपि दर्शकानां मनोरञ्जनं कृतवन्तः। स्थानीयस्य एस.डी. वर्मनसङ्गीतमहाविद्यालयस्य छात्रैः **शङ्कराष्टकम्** तथा च **श्रीकृष्णसत्यभामा** इति द्वे नृत्यनाटिके प्रस्तुते। नागपुरस्थ-कालिदाससंस्कृत-विश्वविद्यालयकलाकारैः 'विकसतु एषा कलिका इति नामिका नाटिका आधुनिकविषयवस्तु आधारीकृत्य प्रस्तुता। सायङ्कालीनसत्रे प्रस्तुतित्रयेण दर्शकाः रञ्जिताः। कालियाचक-आदर्शसंस्कृतमहाविद्यालयस्य छात्रः कृष्णेन्दुबागः स्वकीयनृत्यकौशलेन प्रेक्षकान् आनन्दितवान्। तदनु राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठस्य अध्यापकः श्रीवेङ्कटेशमूर्तिः महाभारतस्य कथानकमाधारीकृत्य एकपात्रीयाभिनयेन सहृदयान् भावाप्लावितानकरोत्। लखनऊस्थ-निसर्गसंस्था **ऊरुभङ्गनाटकं** नूतनशैल्या प्रादर्शयत्।

**त्रिपुराराज्ये रा.सं.संस्थानेन साक्षादायोजितः सर्वप्रथमः एष कार्यक्रमः। अस्मिन् प्रसङ्गे त्रिपुरावासिभिः संस्थानस्य भव्यं स्वागतं कृतम्।**

नाट्योत्सवस्य द्वितीये दिवसे त्रिपुराविश्वविद्यालयस्य प्रेक्षागृहे संस्थानस्य शृङ्गेरीपरिसरच्छात्रैः अभिज्ञानशाकुन्तलं नितरां रमणीयम् अभिनयद्भिः कार्यक्रमस्य शुभारम्भः कृतः। तदनु कालिदास-संस्कृतविश्वविद्यालयच्छात्रैः **पाण्डुः अभिनयं करोति** इति आधुनिकं नाटकम् अभिनीतम्। सायङ्काले पुनरपि सुकान्त-अकादम्याः प्रेक्षागृहे स्थानीय-नालन्दासंस्थया **रवीन्द्रनृत्यं** दीनरामरियाङ्गगणेन **रियाङ्गनृत्यं**, अतश्रीमहापात्रद्वारा **संस्कृतनृत्यं**, नवोदय-अपेरा संस्थया च **निमाईसंन्यासनामकं** नाटकं समीचीनरीत्या प्रस्तुतम्।




समापनसत्रे विराजन्ते त्रिपुराराज्यस्य उद्योगादिविभागमन्त्री जितेन्द्रचौधुरी, त्रिपुराराज्यस्य उच्चशिक्षामन्त्री अनिलसरकारः, कुलपतिः रा.व.त्रिपाठी च।



मणिपुरी-रासनृत्यं प्रदर्शयन्त्यः राधामाधव-सं.म.विद्यालयस्य छात्र्यः



शृङ्गेरीच्छात्रैः प्रदर्शितम् अभिज्ञानशाकुन्तलम्



क.कु.गु.का.सं.वि. विद्यालयस्य प्रस्तुतिः-विकसतु एषा कलिका



शाकुन्तलं वीक्षमाणाः राज्यपालप्रमुखाः प्रेक्षकाः

त्रिदिवसीयस्य संस्कृतनाट्योत्सवस्य अन्तिमे दिने प्रदर्शनचतुष्टयम् अभूत्। तेषु कोलकातास्थ-सुरभारतीसंस्कृतसंस्थया **आत्मनिवेदनम्**, स्थानीयगणेन **मार्गदीपवेदः**, नाम्बोलस्थ-राधामाधव-आदर्शसंस्कृतमहाविद्यालयेन **मणिपुरी-रासनृत्यम्** सोराईसंविद्यारानीद्वारा **दशावतारनृत्यं** च प्रस्तुतम्। संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये समायोजिते समापनकार्यक्रमे मुख्यातिथिरूपेण त्रिपुराशासनस्य उच्चशिक्षामन्त्री श्री-अनिलसरकारः सारस्वतातिथिरूपेण त्रिपुराशासनस्य उद्योगवाणिज्यग्रामीणविकासादि-विभागीयमन्त्री श्री-जितेन्द्रचौधुरी समागत्य प्रेक्षकान् उद्‌बोधितवन्तौ। पौनःपुन्येन एतादृशस्य कार्यक्रमस्य आयोजनं स्यादित्येव सर्वेषां समागतानाम् अभिप्रायः अवलोकितः। संस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठिमहोदयः भारतीयरङ्गमञ्चपरम्परायाः वैशिष्ट्यं, वैविध्यं, सांस्कृतिकत्वं च अधिकृत्य भाषणमकरोत्। उदीयमानाः संस्कृतनिष्ठ-रङ्गमञ्चकौशलसम्बद्धाः प्रतिभाः पुरस्करणीयाः, देशस्य अन्यान्यभागेषु परिचायनीयाः इति उद्देशेन संस्थानम् एतादृशं कार्यक्रमम् आयोजयति इत्यपि कुलपतिवर्येण प्रोक्तम्। डा. शुक्लामुखर्ज्याः संयोजने कार्यक्रमाणां निर्वहणं डा. रत्नमोहनझाः, धन्यवादाविष्करणं च वेङ्कटेशमूर्तिः कृतवन्तौ।



लखनऊस्थ-निसर्गस्य प्रस्तुतिः ऊरुभङ्गम्



सुरभारती-सं.संस्थानस्य 'आत्मनिवेदनम्'



अभिज्ञानशाकुन्तलस्य गा.सा.मु.लोकार्पणम्

सम्पन्नः गुरुवायूर्-परिसरस्य

## शतमानोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरस्य शतमानमहोत्सवः फेब्रवरि मासे २१,२२,२३- तमेषु दिनेषु सम्पन्नः। दिनत्रयव्यापिनि अस्मिन् महामहसि बहवः कार्यक्रमा आयोजिताः। केरलस्य राजस्वमन्त्रिवर्यः राजेन्द्रन् महाभागः कार्यक्रमं समुद्घाट्य शुभाशंसाम् अकरोत्। उद्घाटनभाषणं कुर्वता तेनोक्तं यत् - अस्य संस्थानस्य कृते आवश्यकं सर्वं सहकारं सम्पादयितुं प्रयतिष्ये इति।



शतमानमहोत्सवस्य उद्घाटनावसरे कुलपतिः अन्ये च

आचार्यः वि. एन्. राजशेखरन् पिल्लै (इन्दिरागान्धी-राष्ट्रियमुक्तविश्वविद्यालयस्य कुलपतिः), विधानसमितिसदस्याः- श्री. के. वि. अब्दुलखादरः, श्री तेरम्पिल् रामकृष्णम्, श्री. मुरली पेरुनेल्ली इत्यादयः स्वकीयभाषणैः छात्रान् प्रोत्साहितवन्तः। कार्यक्रमारम्भे स्वागतभाषणं कुर्वता संस्थानकुलसचिवेन आचार्येण रामानुजदेवनाथमहाभागेन अस्य शतमानमहोत्सवस्य महत्त्वम् उपवर्णितम्। पि. टि. कुरियाक्कोस् महाभागस्य संस्कृतानुरागं च अधिकृत्य विवृतम्।

## शतायुः गुरुवायूर्-परिसरः

गुरुवायूर्-परिसरस्य बीजावापः शतात् वर्षेभ्यः पूर्वं (AD 1909) संस्कृतप्रणयभाजनेन कुरियाक्कोस्-महोदयेन कृतः। सर्वविषयगम्भीरायाः सर्वभाषामातुः संस्कृतभाषायाः अध्ययनाय सर्वेभ्यः अवसरं कल्पयितुं लब्धजन्मा कुरियाक्कोस्महोदयः सर्वैः 'संस्कृतप्रणयभाजनम्' इति नाम्ना व्यपदिश्यते।

कुरियाक्कोस्-महोदयः गुरुवायूर्-समीपे पावर्टीनामके रमणीयग्रामे संस्कृतदीपिकाख्यां पाठशालां पर्यकल्पयत्। तत्र संस्कृतानुरागिणां सर्वेषां प्रवेशः परिकल्पितः, शास्त्रेषु कृतभूरिपरिश्रमाः आचार्याश्च नियुक्ताः। तेषामधीने पारम्परिकरीत्या अधीतवन्तः ख्यातिम् अलभन्त। एवमेका संस्कृतविद्वत्परम्परा तत्राजनि। देशस्य कोणे कोणे अस्याः पाठशालायाः कीर्तिः व्याप्ता। अथ एषा पाठशाला कालीकटविश्वविद्यालयेन अङ्गीकृतानाम् उपाधीनां दात्री जाता। पुनः देहलीस्थराष्ट्रियसंस्कृतसंस्थानस्याधीना भूत्वा तस्योपाधीन् दातुमारभत। 'केन्द्रीयसंस्कृतविद्यापीठम्, गुरुवायूर्' इति च ख्यातिं प्राप्नोत्। तदनन्तरं यदा राष्ट्रियसंस्कृतसंस्थानं २००२तमे वर्षे मानितविश्व-विद्यालयत्वेन परिणतमभवत् तदा विद्यापीठमिदं रा. सं. संस्थानस्य गुरुवायूर्परिसरत्वेन व्यपदिश्यते। इदानीं परिसरस्य एकः भागः (नूतनभवनयुतः प्रदेशः) पुरनाटटुकरा- ग्रामे वर्तते। पावर्टीदेशे यत्सदनं भूमिश्च वर्तते तत्सर्वं कुरियाक्कोस्-महोदयेन निश्शुल्कं निस्वार्थं स्वमनसा राष्ट्रियसंस्कृतसंस्थानाय प्रदत्तम्। पं. कुरियाक्कोसस्मृतिभवनयुतः सः प्रदेशः गुरुवायूर्-परिसरस्यैव अपरः भागः। तत्र पत्राचारपाठ्यक्रमसम्बद्धाः क्रियाकलापाः सम्प्रति प्रवर्तन्ते।



विद्वान् कुरियाक्कोसमहोदयः



पावर्टी इत्यत्र शोभमानं कुरियाक्कोस्-स्मृतिभवनम्



शतमानोत्सवे प्रदर्शितकृष्णनाट्यस्य एकं दृश्यम्।

२२-०२-१०-दिनाङ्के शतमानमहोत्सवाङ्गतया राष्ट्रियविचारगोष्ठी आयोजिता। 'नाट्यशास्त्रं केरल-रङ्गमञ्चश्च' इति विषयमवलम्ब्य श्री-वेणुः जि. (निदेशकः, अम्मन्नूर-चाचु-चाक्यार्- गुरुकुलम्), डा. एन्. पि. उन्निः (भूतपूर्वकुलपतिः श्रीशङ्कराचार्य-संस्कृत-विश्वविद्यालयः, कालटी), आचार्यः पि. सि. मुरलिमाधवन् (श्रीशङ्कराचार्य- संस्कृतविश्वविद्यालयः, कालटी) इत्येतैः सर्वैः अभिप्रेरणात्मकं भाषणं कृतम्। आचार्यः के. जि. पौलोस् (केरलकलामण्डलस्य कुलपतिः) अस्य कार्यक्रमस्य उद्घाटनं विधाय अवदत् यत् - शतवर्षेभ्यः प्राक् संस्कृतपठनार्थं पाठशालां संस्थापितवतः पि. टि. कुरियाक्कोस्-महाभागस्य संस्कृतप्रेम अद्य अस्माकम् ऊहातीतमस्ति इति।



वाद्यघोषेण अतिथीनां स्वागतम्

२३-०२-२०१०तमे दिनाङ्के समापनकार्यक्रमस्य उद्घाटनं व्यधात् राष्ट्रपतिसचिवः क्रिस्टि-एल्-फरनाण्डिस् (IAS)-महाभागः। डा. मोहनदासः (कुलपतिः, वैद्यकीय-विश्वविद्यालयः त्रिश्शूर्), डा. जे. प्रसादः (कुलपतिः, श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः कालटी), अडाट्ग्राम- पञ्चायतः अध्यक्षः श्री-अनिल्-अक्करा, सम्पूज्याः वैदिकाः जोनि-आनन्टाणि-पारेक्काट्टिल्, श्रीरामकृष्णाश्रमस्य श्रीप्रशान्तानन्त-स्वामिपादाः, श्री के.एल्. सबास्ट्यन्-प्रभृतयः च आशंसाभाषणं अकुर्वन्।

तस्मिन्नेव दिने सार्धद्विवादने पि. टि. कुरियाक्कोस्- स्मारकभाषणपरम्परायाः प्रथमं भाषणं सम्पन्नम्। स्वभावतः वैज्ञानिकः श्री. वि. एन्. राजशेखरन्-पिल्लै-महोदयः 'विज्ञानं, प्रौद्योगिकी, संस्कृतं च' इत्यस्मिन् विषये अत्यन्तं महत्त्वपूर्णं भाषणं कृतवान्। हैदराबादस्थ-संस्कृत-अकादम्याः निदेशकः डा. श्रीनिवास-वरखेडि-महाभागः अस्मिन्नेव विषये स्वविचारान् प्राकटयत्। डा. दिलीपकुमारराणा (चिन्मय-अन्ताराष्ट्रिय-शोधसंस्थायाः निदेशकः) अपि विषयमुपन्यस्तवान्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिवर्यस्य आचार्यराधावल्लभत्रिपाठिवर्यस्य आध्यक्षे प्रवृत्तेस्मिन् सत्रे कुलसचिवः आचार्यः रामानुजदेवनाथमहोदयोऽपि समुपस्थितः आसीत्। आचार्यः लक्ष्मीनारायणशर्मा स्वागतं व्याहरत्। आचार्या सि. एल्. सिसिली सर्वेभ्यः कृतज्ञतां प्राकटयत्।



पुरनाट्टुकरायां राजते नूतनभवनसमूहः

अस्मिन् महामोहमये कटाहे
सूर्याग्निना रात्रिदिवेन्धनेन।
मासर्तुदर्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्ताः॥

महा.वन. ३.३.११८

सन्तोषामृततृप्तानां
यत्सुखं शान्तचेतसाम्।
न च तद् धनलुब्धानाम्
इतश्चेतश्च धावताम्॥

चाणक्य ७.३

## कुलपतेः दैनन्दिनी




८ तः १०-१-१० – जर्मनीदेशे हमबर्ग इत्यत्र प्रवृत्ते इ.सी.ए.एफ्. (European Consortium for Asian Field Study) इति कार्यक्रमे भागग्रहणम्।

१६-१-१० – भोपालपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्, केन्द्रीयलोकनिर्माण-विभागाधिकारिभिः सह उपवेशनम्।

१७-१-१० – भोपाले संस्कृतकल्याणपरिषदा रा.सं. संस्थानसहयोगेन समायोजिते विद्वत्सम्मेलने आध्यक्ष्यम्।

१८-१-१० – कर्णाटके श्रीसिद्धगङ्गामठीय-संस्कृतमहाविद्यालयेन आयोजितस्य संस्कृतोत्सवस्य समारोपसत्रे अध्यक्षभाषणम्।

२२-१-१० – लखनऊपरिसरे पालि-अध्ययनकेन्द्रस्य उद्घाटनकार्यक्रमे अध्यक्ष-भाषणम्।

– लखनऊनगरे भारतीयदार्शनिकानुसन्धानपरिषदा (I.C.P.R.) आयोजित-कार्यक्रमे चर्चासत्रे भागग्रहणम्।

२४-१-१० – हरिद्वारस्थस्य उत्तराखण्डसंस्कृतविश्वविद्यालयस्य प्रबन्धमण्डलस्य उपवेशने भागग्रहणम्।

२७-१-१० – जम्मूस्थरणवीरपरिसरे वार्षिकोत्सवे विशिष्टभाषणम्।

२८-१-१० – जम्मूपरिसरे आयोजितायाः अखिलभारतीय-शैवदर्शनव्याख्यानमालायाः उद्घाटनावसरे अध्यक्षीयं भाषणम्।

३०-१-१० – लखनऊनगरे सम्पन्ने उत्तरप्रदेशसंस्कृतसंस्थानेन घटितायाः पुरस्कारनिर्णयसमितेः उपवेशने विशेषज्ञत्वेन उपस्थितिः।

०१-२-१० – कालियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य भवनस्य उद्घाटनकार्यक्रमे अध्यक्षता।

०२-२-१० – कोलकातायां आयोजिते पं. गौरीनाथशास्त्रिस्मृतिव्याख्यानमालाकार्यक्रमे अध्यक्षीयभाषणम्।

१५तः १७-२-१० – त्रिपुराराज्ये अगरतलायाम् अखिलभारतीय-संस्कृतनाट्योत्सवस्य आयोजनम्।

२०-२-१० – गुरुवायूरुपरिसरस्य शतमानोत्सवकार्यक्रमे उद्घाटनसत्रे आध्यक्ष्यम्।

२६ तः २७-२-१० – कोलकातायां करगपुरस्थ-भारतीयसूचनाप्रौद्योगिकीसंस्थया (IIT Kharagpur) 'भारतीयसौन्दर्यशास्त्रमधिकृत्य आयोजितायां राष्ट्रियसङ्गोष्ठ्याम् उपोद्घातभाषणम्।

२-३-१० – नवदेहल्यां भारतीय-सांस्कृतिक-अनुसन्धानपरिषदः (ICCR) शैक्षिकपरामर्शदातृमण्डलस्य उपवेशने भागग्रहणम्।

७-३-१० – हरिद्वारस्थ-श्रीभगवान्दास-आ.सं. महाविद्यालये प्रवृत्तायां पं. स्वामिगुरुचरणदासजी महाराजस्मृतिशास्त्रीय-व्याख्यानमालायां विशिष्टभाषणम्।

१० तः १२-३-१० – नवदेहल्यां श्री ला.ब.शा.रा.सं. विद्यापीठे आयोजितायां त्रिदिनात्मकसाहित्यिकसङ्गोष्ठ्यां भागग्रहणम्।

१९-३-१० – वाराणस्याम् इ.गा.रा.क. केन्द्रेण (IGNCA) आयोजिते कार्यक्रमे व्याख्यानप्रदानम्।

२१-३-१० – ग्वालिखेरा (उ.प्र.) इत्यत्र श्री दादु-बलराम-संस्कृतमहाविद्यालयेन आयोजिते ५७तमे वार्षिकोत्सवे आध्यक्ष्यनिर्वहणम्।

२५-३-१० – नवदेहल्यां टागोरगार्डन्-स्थित-केन्द्रीयविद्यालयस्य प्रबन्धसमितेः उपवेशने अध्यक्षता।

२९-३-१० – नवदेहल्यां श्री-ला.ब.शा.रा.सं. विद्यापीठेन समायोजितायां सङ्गोष्ठ्याम् उपस्थितिः।

३०-३-१० – उ.प्र. संस्कृतसंस्थानेन आयोजिते पुरस्कारार्हाणां चयनसमितेः उपवेशने विशेषज्ञत्वेन उपस्थितिः।

३, ४-४-१० – राजकोटस्थ-सौराष्ट्रविश्वविद्यालये प्रवृत्ते कुलपतीनां सम्मेलने भागग्रहणम्।

६-४-१० – संस्थानमुख्यालये प्रतिष्ठापितस्य 'वाङ्मयी'-इत्यस्य भाषानुशीलनकेन्द्रस्य उद्घाटनावसरे आध्यक्ष्यम्।

८-४-१० – भारतशासनेन पद्मश्री-विरुदेन सम्मानितस्य शेल्डान-पोलाक् इत्यस्य वैदेशिक-विदुषः अभिनन्दनकार्यक्रमे आध्यक्ष्यम्। ई-ग्रन्थनिर्माणाय बद्धश्रद्धया वियेन्नास्थया 'सरित्' इति संस्थया साकं पारस्परिकः अनुबन्धः (M.O.U.) कृतः।

९ त: ११-४-१० – मुख्यालये सहायकग्रन्थपाल-चयनसमिते: उपवेशने अध्यक्षता।

१५ त: १७-४-१० – शिमलायां भारतीय-प्रगताध्ययनसंस्थया महाभारतविषयकाध्ययनाय आयोजिते अध्ययनसत्रे व्याख्यानप्रदानम्।

२०-४-१० – नवदेहल्यां टागोरगार्डनस्थित-केन्द्रीयविद्यालयस्य प्रबन्धसमिते: उपवेशने आध्यक्ष्यम्।

२१-४-१० – रा.सं.संस्थानस्य प्रबन्धमण्डलस्य उपवेशने अध्यक्षता।

२२, २३-४-१० – मुख्यालये अनुदेशकपदपूरणाय घटितसमिते: उपवेशने अध्यक्षता।

२४-४-१० – हरिद्वारस्थस्य उत्तराखण्ड-संस्कृतविश्वविद्यालयस्य कार्यपरिषद: उपवेशने भागग्रहणम्।

२६-४-१० – रा.सं.संस्थानस्य दूरस्थशिक्षाकेन्द्रभूतस्य मुक्तस्वाध्यायपीठस्य गतिविधीनाम् अवलोकनाय दूरस्थशिक्षापरिषदा (D.E.C.) कृतनिरीक्षणावसरे आयोजिते उपवेशने समुपस्थिति:।

४-५-१० – नवदेहल्यां टागोरगार्डन्-स्थित-केन्द्रीयविद्यालयस्य वार्षिकोत्सवे समुपस्थिति:।

७-५-१० – विश्वसंस्कृतपुस्तकमेलायोजनस्य परामर्शदातृसमिते: प्रथमोपवेशने भागग्रहणम्।

११-५-१० – इ.गा.रा.क. केन्द्रस्य (I.G.N.C.A.) कार्यक्रमपरामर्शदातृसमिते: उपवेशने भागग्रहणम्।

१२-५-१० – रा.सं.संस्थानस्य वित्तसमिते: उपवेशने आध्यक्ष्यम्।

१९-५-१० – संस्थाने सत्रार्ध (सेमेष्टर)-परीक्षाप्रणाल्या: आरम्भविषये चिन्तनाय आयोजिते उपवेशने, प्राचार्याणाम् उपवेशने च आध्यक्ष्यम्।

२०-५-१० – संस्थानस्य विद्यापरिषद: उपवेशने आध्यक्ष्यम्।

२४-५-१० – पूर्वोत्तरराज्यानां, स्वायत्तसंस्थानां च कृते प्रदेय-सम्भावितधनराशिविषये चिन्तनाय आयोजितोपवेशने मा.सं.वि. मन्त्रालयस्य संयुक्तसचिवया (भाषाया:) सह समुपस्थिति:।

२६-५-१० – मा.सं.वि. मन्त्रिण: श्री-कपिलसिब्बलमहोदयस्य आध्यक्ष्ये प्रवृत्ते "ह्रीयमाणानाम् उत्तमज्ञानशाखानां, सङ्कटग्रसितानां भाषाणां च संरक्षणम्" इति-विषयके चिन्तनसत्रे भागग्रहणम्।

१-६-१० – हैदराबादस्थ-भारतीयसूचनाप्रौद्योगिकीसंस्थया (IIIT, Hyderabad) सम्पाद्यमानाया: 'संस्कृताधारितविश्लेषण-व्यवस्था' (Sanskrit Based Analitical System) इत्यस्या: परियोजनाया: प्रगतिवीक्षणाय देहल्यां मानवसंसाधन-विकासमन्त्रालये आयोजिते उपवेशने उपस्थिति:।

२-६-१० – तिरुपतिस्थ-रा.सं.विद्यापीठस्य कार्यपरिषद: उपवेशने उपस्थिति:। तिरुपतौ रा.सं. विद्यापीठे प्रवृत्ते ४५तमे अ.भा.प्रा.वि. सम्मेलने भागग्रहणम्, तत्र रा.सं.संस्थानपक्षत: पण्डितपरिषद: प्रायोजनम्।

६-६-१० – संस्थानसहयोगेन उज्जयिन्यां कालिदाससंस्कृत-अकादम्या आयोजिताया: संस्कृतनाट्यकार्यशालाया: समापनसत्रे भागग्रहणम्।

१०-६-१० – संस्कृतविश्वविद्यालयानां पाठ्यक्रमेषु प्रवेशाय संयुक्त-प्रवेशपरीक्षाया: (Combined Entrance Test) आयोजनविषये, समानपाठ्यक्रमस्य अङ्गीकारविषये च चिन्तनाय आयोजितायां चिन्तनगोष्ठ्याम् उपस्थिति:।

१७-६-१० – मा.सं.वि. मन्त्रालयस्य संयुक्तसचिवाया: (भाषा) आध्यक्ष्ये संस्थानमुख्यालये प्रवृत्ते अनुदानसमिते: उपवेशने समुपस्थिति:।

१९-६-१० – भोपालपरिसरस्य भवननिर्माणविषये प्रगतिवीक्षणात्मके उपवेशने भागग्रहणम्। भोपाले समन्वयभवने प्रवृत्ते कार्यक्रमे श्रीश्रीजयेन्द्रसरस्वतीमहास्वामिनाम् उपस्थितौ अवतार-महोत्सव-पुरस्कार: प्राप्त:।

२०-६-१० – लखनऊनगरे अ.भा. संस्कृतपरिषदा 'संस्कृतसाहित्ये मानवाधिकार:' इति विषयमधिकृत्य आयोजिताया: राष्ट्रियसङ्गोष्ठ्या: उद्यापनसत्रे भाषणम्। उत्तरप्रदेशस्य राज्यपालेन सह सम्भाषणम्। लखनऊपरिसरे प्रवृत्ते अनौ.सं.शि. प्रशिक्षणवर्गे प्रशिक्षणार्थिन: उद्दिश्य उद्बोधनम्।

२५-६-१० – संस्थानमुख्यालये विभागीयप्रोन्नतिसमिते: उपवेशने आध्यक्ष्यम्।

२८-६-१० – संस्थानस्य वित्तसमिते:, प्रबन्धमण्डलस्य उपवेशने च आध्यक्ष्यम्।

२९-६-१० – प्रकाशनसमिते: उपवेशने अध्यक्षता।

३०-६-१० – मा.सं.वि. मन्त्रालये भाषाविषयकनिदेशकसविधे प्रवृत्ते राष्ट्रपतिपुरस्कारविषयके उपवेशने समुपस्थिति:।

♦♦♦



उद्घाटनोत्सवे वि.कु.जैनः, कुलपतिः रा.व.त्रिपाठी, राज्यपालः बि.एल्. जोशी, अनिताभटनागर-जैनः, स.ना.झाः च

## उद्घाटितं पालिविषयकमध्ययनकेन्द्रम्

रा.सं.संस्थानस्य लखनऊपरिसरे पालि-विषयकम् अध्ययनकेन्द्रं समारब्धम्। केन्द्रमिदम् उत्तरप्रदेशस्य महामहिमशालिना राज्यपालेन श्रीमता बी.एल्. जोशी-महोदयेन २२-१-२०१०तमे दिनाङ्के समुद्घाटितम्। पालिग्रन्थानाम् अध्ययनं, गवेषणा, त्रिपिटकादीनां प्रसिद्ध-पालिग्रन्थानां संस्कृतानुवादः इत्यादिकार्येषु केन्द्रमिदं बद्धश्रद्धं भविष्यति। उद्घाटन-भाषणावसरे महामहिमराज्यपालः केन्द्रेऽस्मिन् सम्पत्स्यमानं कार्यं हृदाऽभ्यनन्दत्।

विशिष्टातिथिरूपेणोपस्थिता भारतसर्वकारस्य भाषाविभागीयसंयुक्तसचिवा श्रीमती अनिता-भटनागर-जैनमहोदया देशविदेशयोर्मध्ये पालिसंरक्षणकार्यं समीक्ष्य लक्ष्मणपुर्यां प्रवर्तितं पालिसंरक्षणकार्यं सर्वविधसौविध्येन सभाजयितुं सभामध्ये सहर्षं प्रोक्तवती। मुख्यातिथि-रूपेणोपस्थितो राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी प्रवर्तमानां पालिशालिकां संस्कृतेन प्राकृतेन च संपुटितां कर्तुं निजां कामपि समीहां प्रकटयन् समुद्घाटितस्य पालिकेन्द्रस्य प्रयोजनपरां पूर्वोक्तां त्रिविधां लोकमहितां प्रवृत्तिमपि पर्यचाययत्। परिसरस्य प्राचार्यः सर्वनारायणझाः पालिकेन्द्रेण स्वकीयं परिसरं सम्पन्नं मन्यमानः स्वागतभाषणे केन्द्रस्योद्देश्यं व्यवृणोत्। परिसरे बौद्धदर्शनविभागाध्यक्षः विजयकुमारजैनः स्वकीये धन्यवादज्ञापने पालिकेन्द्रस्योद्घाटनं तावदैतिहासिकं प्रोक्तवान्। बौद्धदर्शनस्योपाचार्यः डॉ० अवधेशकुमारचौबे बौद्धदर्शनाध्यापको डॉ० गुरुचरणसिंहनेगी संस्कृत-पालिभाषाभ्यां कार्यक्रमसञ्चालनम् अकुरुताम्।

## अखिलभारतीयं पालि-प्राकृतसम्मेलनम्

रा.सं. संस्थानस्य लखनऊपरिसरे मार्च्-मासस्य २७-२८-दिनाङ्कयोः 'संस्कृतस्य पालि-प्राकृतयोश्च अन्तःसम्बन्धः' इति विषयमधिकृत्य सम्मेलनं प्रवृत्तम्। आचार्यः जी.सी. त्रिपाठी (भूतपूर्वनिदेशकः, कलाकोषः, इ.गा.रा.क.के.) कार्यक्रममेनं समुदघाटयत्। उद्घाटनसत्रं कुलसचिवस्य आ. रामानुजदेवनाथमहोदयस्य आध्यक्ष्ये सम्पन्नम्। श्रीजगदीशगान्धी विशिष्टातिथिरूपेण समाहूत आसीत्। उद्घाटनभाषणे आ. जी.सी. त्रिपाठी अभिप्रायं प्राकटयत् यत् पालि-प्राकृतयोः, संस्कृतस्य च अन्तःसम्बन्धविषये अनुशीलनेन ग्रन्थावगतिः सुष्ठुतरः स्यात्, भारतीय-सांस्कृतिक-परम्परायाः च सम्यगवगतिः स्यादिति च। अध्यक्षभाषणं कुर्वन् आ.देवनाथमहोदयः अवदत् यत् सम्मेलनमिदं पालि-प्राकृत-संस्कृतानां साहित्यिक-सांस्कृतिक-विकासविषये अनुशीलनं कृतवतः संस्थानकुलपतेः राधावल्लभत्रिपाठिमहोदयस्य परिश्रमेण साकारतां प्राप्नोत् इति। अवसरेऽस्मिन् 'प्राकृतभाषा-भारतीयपरम्परा' इति ग्रन्थः, संस्कृतविमर्शस्य तृतीयः अङ्कः च लोकाय समर्पितः। विशिष्टातिथिः श्रीजगदीशगान्धी 'महात्मनः बुद्धस्य महावीरस्य च लोककल्याणकारकाः उपदेशाः अस्माभिः ज्ञेयाः' इति आशयं प्रकटितवान्। आचार्यः सुरेन्द्रपाठकः सर्वेभ्यः स्वागतवचांसि व्याहरत्। आ. विजयकुमारजैनः कृतज्ञताः, ज्ञापितवान्।

अस्मिन् सम्मेलने सप्तसु सत्रेषु भागग्राहिणः स्वीयानि शोधपत्राणि प्रस्तुतवन्तः। २७तमे दिनाङ्के सायं छात्रैः डा. रामलखनपाण्डेय-डा.राकाजैनयोः निदेशने सुत्तनिपातस्य धनियसुत्तस्य प्रस्तुतिः कृता।

विभिन्नविषयक-चिन्तनसत्राणि विभिन्नप्रदेशेभ्यः समागतैः विद्वद्भिः आचार्यैः सङ्घसेनसिंह-विमलकीर्ति-अङ्गराजचौधरी-हरिशङ्करशुक्ल-शेरबरेहालडी-शीपालजोर-प्रेमसुमनजैन-भागचन्द्र-जैन-वृषभप्रसादजैन-एस्.पी.नारङ्ग-रमाकान्तशुक्ल-सुदीपजैन-प्रभृतिभिः अध्यक्षपदम-लङ्कृत्य सञ्चालितानि।



भाषमाणः अशोककुमारकालिया



भाषमाणः वृजेशकुमारशुक्लः। मञ्चे-अवधेशकुमारचौबे, सुरेन्द्रपाठकः, एस्.पी. शर्मा, अशोककुमारकालिया, धर्मवीरजैनः, शुक्ला मुखर्जी च

समापनसत्रं तावत् सम्पू. सं. विश्वविद्यालयस्य भूतपूर्वकुलपतेः आ. अशोककुमारकालियामहोदयस्य आध्यक्ष्ये सम्पन्नम्। तत्र मुख्यवक्तृरूपेण आचार्यः एस्.पी.शर्मा (अलीगढ़), आचार्यः ब्रजेशशुक्लः (संस्कृतविभागाध्यक्षः, लखनऊ-वि.वि.), विशिष्टातिथिरूपेण श्री धर्मवीरजैनः (लखनऊ) च सभामनुगृहीतवन्तः। डा. शुक्लामुखर्जी (परियोजना अधिकारी, रा.सं.सं.) सर्वेभ्यः भागग्राहिभ्यः, विशिष्टेभ्यः उपस्थितेभ्यः, सहकृतवद्भ्यः च धन्यवादं समार्पयत्। सम्मेलनस्य विभिन्नानि सत्राणि पालि-प्राकृतविभागस्य अध्यक्षेण विकासाधिकारिभिः, अनुसन्धातृभिः च संयोजितानि।

गरलीपरिसरे

## पतञ्जलिविश्वविद्यालयस्य हरिद्वारस्थस्य सहयोगेन हस्तलिखितग्रन्थ-सम्पादनयोजना

हरिद्वारस्थस्य पतञ्जलिविश्वविद्यालयस्य कुलपतिना आचार्यबालकृष्ण-महाभागेन कुलाधिपतिना स्वामिरामदेवमहोदयेन च सह संस्थानस्य प्रतिनिधिरूपेण गरलीपरिसरस्य प्राचार्यः प्रकाशपाण्डेयमहोदयः, उपाचार्यः डा. विजयपालशास्त्रिमहोदयश्च १२-०४-२०१०-मिते दिनाङ्के मिलितवन्तौ। पारस्परिकचर्चायां पतञ्जलिविश्वविद्यालये सङ्गृहीतानां प्राचीनानां दुर्लभ-संस्कृतहस्तलेखानां सम्पादने प्रकाशने च मिथः सहयोगं कर्तुं निश्चयोऽभूत्। संस्थानस्य कुलपतिना आचार्यराधावल्लभत्रिपाठिमहोदयेन पतञ्जलिविश्व-विद्यालयस्य कुलपतिम् आचार्यबालकृष्णमहाभागं प्रति प्रतिनिधिद्वारा प्रेषिते पत्रे एतद्विषयकः स्वाभिप्रायः प्रकाशितः। आचार्यबालकृष्णमहोदयेन स्वामिरामदेव-महाभागेन च सहर्षमयं प्रस्तावः स्वीकृतः। विषयेऽस्मिन् यथासम्भवं सर्वविधं सहयोगं च कर्तुं प्रतिज्ञातम्।



स्वामिरामदेवमहोदयस्य कृते संस्थानप्रकाशनं प्रयच्छन् प्रकाशपाण्डेयः, पार्श्वे विजयपालशास्त्री, बालकृष्णः च

गरलीपरिसरप्राचार्येण संस्थानपक्षतः पतञ्जलिविश्वविद्यालयस्य कुलपतये कुलाधिपतये च संस्थानस्य शोधविमर्शपत्रिका अन्यद्विशिष्टसाहित्यञ्च उपायनीकृतम्। विशिष्टानां हस्तलेखानां सूची पतञ्जलिविश्वविद्यालयात् प्राप्ता। तदनुसारेण शोधार्थिनां छात्राणां कृते सम्पादनीयग्रन्थानां विवरणं सज्जीकृतम्। भविष्यति काले विशिष्टहस्तलेखान् पतञ्जलिविश्वविद्यालयादधिगत्य शोधार्थिनां कृते शोधविषयत्वेन दत्त्वा तेषां समीक्षात्मकं सम्पादनं प्रकाशनञ्च कारयिष्यते।

पतञ्जलिविश्वविद्यालये संरक्षिताः इमे हस्तलेखाः बाहुल्येन पुण्यपत्तनस्थात् आनन्दाश्रमात् प्राप्ताः। हस्तलेखसङ्ग्रहेऽस्मिन् विशेषेण साहित्यायुर्वेदव्याकरणज्यौतिषकर्मकाण्डपौरोहित्यवैदिकविषयसम्बद्धाः हस्तलेखाः सन्ति। वेदविषयकाणां हस्तलेखानां सङ्ख्या सर्वाधिका विद्यते। द्वयोः विश्वविद्यालययोः सहयोगेन एतत्सङ्ग्रहगतानाम् अप्रकाशितहस्तलेखानां सम्पादनेन प्रकाशनेन च नूनमपूर्वो निधिः प्रकाशमेष्यति लोकोपकाराय च कल्पिष्यते।




भाषमाणः सुकान्तकुमारसेनापतिः, रमेशचन्द्रपण्डा, सुब्बरायडुः, गङ्गन्ना च

## पुर्यां श्रीसदाशिवपरिसरे

### व्याकरणशास्त्रे विशिष्टव्याख्यानमाला

श्रीसदाशिवपरिसरे २६.०२.२०१०-दिनाङ्के व्याकरणविभागे व्याकरणव्याख्यानमाला आयोजिता। तत्र काशीहिन्दुविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः रमेशचन्द्रपण्डावर्यः समागत्य व्याकरणशास्त्रस्य विविधप्रयोजनानि प्रत्यपादयत्।

### वाणीविलासपरिषदः समारोपसमारोहः

परिसरीया वाणीविलासपरिषद् २६.०२.२०१०तमे दिनाङ्के समापनसमारोहं पर्यपालयत्। समापनकार्यक्रमोऽयं प्राचार्यस्य गङ्गन्ना-महोदयस्य, परिषन्मार्ग-दर्शकयोः आ. हरेकृष्णमहापात्र- डा. सुकान्तकुमारसेनापतिमहोदययोः च उपस्थितौ आयोजितः। परिषदः अन्यतमः मार्गदर्शकः सेनापतिवर्यः वाणीविलासपरिषदः वार्षिकविवरणीम् उपास्थापयत्। शास्त्रिद्वितीयवर्षस्य छात्राः - श्री शुभसुन्दरः, सौम्यरञ्जनः, सुब्रतषडङ्गी च परिषदः अधिवेशनेषु सर्वाधिकोपस्थित्या पुरस्कारभाजः अभवन्। अखिलभारतशास्त्रीयवाक्स्पर्धायां, तिरुपतौ प्रवृत्तायां छात्रप्रातिभप्रतियोगितायां च पुरस्कृतेभ्यः स्वर्ण-रजत-कांस्यपदकविजेतृणाम् अभिनन्दनमपि एतस्मिन् अवसरे कृतम्।

### शिक्षाशास्त्रिविभागस्य विशिष्टव्याख्यानमाला-

२८.०१.२०१०-दिनाङ्के शिक्षाशास्त्रविभागेन काचित् व्याख्यानमाला आयोजिता। तत्र राष्ट्रपतिपुरस्कारभाक् आचार्यः आर्.एन्.अरलिकट्टिवर्यः व्याख्यातृत्वेन समाहूतः। संस्कृते भाषाध्यापन-साहित्याध्यापन-शास्त्राध्यापनानां प्रणाली इति विषयमधिकृत्य अरलिकट्टिमहोदयः प्रभाविशैल्या समबोधयत्।



व्याकरणशास्त्रीय-विशिष्टव्याख्यानमालायां भाषमाणः रमेशचन्द्रपण्डा

### राष्ट्रियार्हतापरीक्षा-सज्जीकरणकक्षा

विश्वविद्यालय-अनुदान-आयोगेन सञ्चाल्यमानायाः राष्ट्रियार्हतापरी-परीक्षायाः (NET) निमित्तं सज्जीकरणकक्षा सञ्चालनीया इति सङ्कल्पं पुरस्कृत्य तदर्थम् एकम् अभिज्ञदलं निर्मितम्। तत्र मार्गदर्शकरूपेण आ. फकीरमोहनपण्डा, आ. हरेकृष्णमहापात्रः च नियोजितौ। धर्मशास्त्रे - डा. ललितकुमारसाहुः, साहित्ये - डा. सूर्यमणिरथः, वेदान्ते, इतरदर्शने च - डा. सुकान्तकुमारसेनापतिः, व्याकरणे - डा. दुर्गाचरणषडङ्गी, न्याये, मीमांसायां च - डा. गणपतिशुक्लः, पुराणे आगमे च - डा. मखलेशकुमार-उपाध्यायः, ज्योतिषे - डा. मनोजश्रीमलः, प्रथमद्वितीयपत्रयोः डा. रमाकान्तमिश्रः च विषयविशेषज्ञरूपेण नियोजिताः आसन्। एताः सज्जीकरणकक्षाः डा. रमाकान्तमिश्रः समयोजयत्।

### पू.शि.शा.प. प्रशिक्षणम्-

पूर्वशिक्षाशास्त्रिपरीक्षायाः निमित्तम् अपेक्षितं ज्ञानं कौशलं च वर्धयितुं परिसरेण १५-२-२०१० तः १-४-२०१० पर्यन्तं सज्जीकरणकक्षा आयोजिता। परिसरप्राचार्यस्याध्यक्ष्ये प्रवृत्ते उद्घाटनकार्यक्रमे अमृतभाषानाम्न्याः संस्कृतमासपत्रिकायाः सम्पादकः डा. कुमारचन्द्रमिश्रः अतिथिरूपेण समुपस्थितः। प्रतिदिनं प्रातः अष्टवादनतः सार्धनववादनपर्यन्तं प्रशिक्षणकक्षा प्राचलत्।

## गङ्गानाथझा-परिसरे

### अनौपचारिक-संस्कृत-शिक्षणस्य द्वितीयचक्रमुद्घाटितम्



श्यामसुन्दरपाण्डेयः, शिवशङ्करशुक्लः, सुरेन्द्रझाः, आनन्दकुमारश्रीवास्तवः च

प्रयागस्थे राष्ट्रिय-संस्कृत-संस्थानाङ्गभूते गङ्गानाथ-झा-परिसरे ११-१-२०१०तमे दिनाङ्के राष्ट्रिय-संस्कृत-संस्थानेन प्रायोजितस्य अनौपचारिक संस्कृत-शिक्षणपाठ्यक्रमस्य द्वितीयचक्रं समारोहमुखेनोद्घाटितम्। अस्मिन् उद्घाटनसमारोहे सर्वप्रथमं केन्द्रसंयोजकेन डा. बनमालीविश्वालेन एतत्पाठ्यक्रमस्य उद्देश्य-वैशिष्ट्यादिविषयेषु छात्राणां ध्यानमाकृष्टम्। मुख्यातिथि-महोदयेन डा. आनन्दकुमारश्रीवास्तवेन संस्कृतभाषायाः महत्त्वं बहुभिरुदाहरणैः स्पष्टीकृतम्। समारोहस्य आध्यक्ष्यं निर्वहता केन्द्राध्यक्षेण परिसरीय-प्राचार्येण सुरेन्द्रझा-महोदयेन उपस्थिताः छात्राः अन्ये संस्कृतानुरागिणः श्रोतारश्च उद्बोधिताः। श्रीश्यामसुन्दर-पाण्डेयेन सञ्चालिते कार्यक्रमे केन्द्रशिक्षकेण श्रीशिवशङ्करशुक्लेन मञ्चस्थाः अतिथयः तथा च उपस्थिताः श्रोतारः धन्यवादैः सभाजिताः।



अध्यक्षभाषणं कुर्वन् सुरेन्द्रझाः, मञ्चे-अपराजिता मिश्रा, शैलकुमारीमिश्रा, ललितकुमारत्रिपाठी च

### राष्ट्रिय-युवदिवस-समारोहः आयोजितः

प्रयागस्थे गङ्गानाथझा-परिसरे १२-१-२०१०तमे दिनाङ्के विवेकानन्द-जयन्तीमुपलक्ष्य 'युवदिवस'-समारोहः समायोजितः। अस्मिन् अवसरे आयोजितायां सङ्गोष्ठ्यां 'विवेकानन्दस्य जीवनं, दर्शनं तथा अद्यतनस्य युववर्गस्य कृते तस्य सङ्कल्पना' इति विषयमधिकृत्य विद्वद्भिः स्वकीयाः विचाराः व्यक्तीकृताः। कार्यक्रमस्य अध्यक्षता प्राचार्येण सुरेन्द्रझामहोदयेन विहिता। कार्यक्रमस्य सञ्चालनं डा. अपराजिता-मिश्रया कृतम्। आचार्यया शैलकुमारीमिश्रया, डा. ललितकुमारत्रिपाठिना, डा. जनार्दनप्रसादपाण्डेयेन, डा. शैलजापाण्डेयया, डा. रामकिशोरेण, डा. घनानन्दत्रिपाठिना, डा. मानसशरण-तिवारिणा तथा जितेन्द्रपाण्डेयेन च एतद्विषयकं वक्तव्यं प्रस्तुतम्।

## भोपालपरिसरे वार्षिकोत्सवः सम्पन्नः

भोपालपरिसरे १६-१-२०१०तमे दिनाङ्के प्रवृत्ते वार्षिकोत्सवे भोपालपरिसरीय- पत्रिकायाः लोकार्पणं कुर्वन्तः - कुलपतिः आचार्यः राधावल्लभत्रिपाठी, सभाध्यक्षः आचार्यः श्रीनिवासरथः, सारस्वतातिथिः आचार्यः मिथिलाप्रसादत्रिपाठी, विशिष्टातिथिः श्रीसुभाषत्रिपाठी च। वामतः दृश्यते परिसरप्राचार्यः आजादमिश्रः।






वार्षिकोत्सवे राजेन्द्रसिंह-चिबं सम्मानयन्तः-कुलपतिः रा.व.त्रिपाठी, ज.क. पूर्वन्यायाधीशचरः, प्राचार्यः विश्वमूर्तिशास्त्री च

## जम्मूपरिसरे

### ▶ वार्षिकोत्सवः

जम्मूस्थ-श्रीरणवीरपरिसरे जनवरीमासस्य सप्तविंशतितमे दिनाङ्के वार्षिकोत्सवस्य आयोजनमभूत्। जम्मूकाश्मीरशासनस्य प्रौद्योगिकी-चिकित्सा-युव-क्रीडाविषयाणां मन्त्री श्री राजेन्द्रसिंहचिबः मुख्यातिथित्वेन समामन्त्रितः आसीत्। न्यायाधीशः श्री जी.डी. शर्मा विशिष्टातिथिरूपेण उपस्थाय छात्रान् उदबोधयत्। सर्वोऽप्ययं कार्यक्रमः संस्थानस्य कुलपतिवर्यस्य आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये सम्पन्नः। वार्षिकोत्सवमुपलक्ष्य आयोजितासु स्पर्धासु विजयिभ्यः पुरस्काराः प्रदत्ताः। परिसरप्राचार्येण विश्वमूर्तिशास्त्रिवर्येण परिसरस्य वार्षिकगतिविधीनां विवरणं सभायां प्रस्तुतमासीत्।

### ▶ त्रैमासिकपाठ्यक्रमस्य सम्पूर्तिः

०५-२-२०१०-तमे दिनाङ्के जम्मूपरिसरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रे प्रवृत्तस्य त्रैमासिकस्य प्रथमदीक्षापाठ्यक्रमस्य सम्पूर्तिकार्यक्रमः प्रवृत्तः। एतस्मिन् कार्यक्रमे जम्मूकाश्मीरस्य अनौ.सं.शिक्षणस्य प्रान्तसंयोजकः आचार्यः विश्वमूर्तिशास्त्री अध्यक्षरूपेणोपस्थितः आसीत्। परिसरीयः ज्योतिषविभागाध्यक्षः आचार्यः इन्द्रमणिदासः मुख्यातिथिपदमलङ्कृत्य सभां सम्बोधितवान्। स्वीयभाषणे तेनोक्तं यत् जम्मू-काश्मीरे अनौ.सं.शिक्षणस्य कारणतः जनेषु, राज्यशासनाधिकारिषु च संस्कृतविषयिणी श्रद्धा वर्धमाना दृश्यते इति। केन्द्रसंयोजकः डा. नारायणन् ई.आर्. स्वागतभाषणं कृतवान्। अन्ते केन्द्रशिक्षिका सुश्रीः नीतू शर्मा धन्यताभावं व्यज्ञापयत्।

### ▶ संस्कृतव्याख्यानमाला

जम्मूपरिसरेण ३०-३-२०१०तः त्रिदिवसीया संस्कृतभाषणमाला आयोजिता। तत्र राज्यस्य मूर्धन्यविदुष्या जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरया आचार्यया वेदकुमारी घई इत्यनया नीलमतपुराणम् इति विषयमधिकृत्य विशिष्टं भाषणं कृतम्। आचार्यः बदरीनाथकल्लामहोदयः शैवागमविषये, आचार्यः सत्यपालश्रीवत्सः भाषाविज्ञानविषये, डा. गङ्गादत्तविनोदमहोदयः वेदविषये च अभाषन्त। (चित्र योजनीयम्)



बलजिन्नाथपण्डित-शैवागमव्याख्यानमालायाः अवसरे समुपस्थिताः यशपाल-खजूरिया, हरिनारायणतिवारी, वि.मू.शास्त्री च

### ▶ स्काउट-गाइड-शिविरं सम्पन्नम्

५-३-२०१०तमे दिनाङ्के पूर्वाह्ने श्री रणवीरपरिसरस्य शिक्षाशास्त्रिकक्षायाः छात्राध्यापकानां प्राथमिक-स्काउट- गाइड-प्रशिक्षणशिबिरस्य समापनकार्यक्रमः सम्पन्नः। मुख्यातिथिरूपेण आचार्यः वैद्यनाथझाः, विशिष्टातिथिरूपेण उषाचूनी (स्का.-गा.-आयुक्ता), मुहम्मद-शेख-यासीनः (स्का. नायकः) च समुपस्थितौ आस्ताम्। श्री शीशरामः कार्यक्रमान्ते समुपस्थितेभ्यः धन्यवादं समार्पयत्।

## शृङ्गेर्यां प्रवृत्ता व्याकरणप्रशिक्षणकार्यशाला




कार्यशालायाः शुभारम्भं कुर्वती पुष्पादीक्षितवर्या, पार्श्वे ए.पि. सच्चिदानन्दः, सि.एस्.एस्. नरसिंहमूर्तिः च

पाणिनीयाष्टाध्याय्याः विशेषावगतिपुरस्सरं व्याकरणशास्त्रे छात्राणां विशिष्टानुसन्धानप्रवृत्तिः भवतु इति उद्देशेन **शृङ्गेरीस्थ-राजीवगान्धीपरिसरे** ४-१-२०१० तः १८-१-२०१०-पर्यन्तं व्याकरण-प्रशिक्षण-कार्यशाला आयोजिता। पाणिनीय-शोधकेन्द्रस्य निदेशिका आचार्या पुष्पादीक्षितवर्या कार्यक्रममेनम् उदघाटयत्। उद्घाटनभाषणावसरे तया 'अष्टाध्याय्याः संरचना अत्यन्तं वैज्ञानिकी, अष्टाध्याय्याः संरचनायाः अन्तस्तत्त्वं यदि छात्राः जानीयुः तर्हि समस्तं वाङ्मयं ज्ञातुं काठिण्यं नानुभवेयुः' इति स्वाभिप्रायः प्राकाशि। कार्यक्रमे भाषमाणः मुख्यातिथिः श्रीसद्विद्या-सञ्जीविनीसंस्कृतमहापाठ-शालायाः प्राचार्यः नागराजभट्टः महाभाष्यकारोक्तव्याकरणाध्ययनप्रयोजननिरूपणपुरस्सरं, साम्प्रतिकयुगे एतादृशप्रशिक्षणकार्यशालानाम् आयोजनस्य आवश्यकतां प्रत्यपादयत्। परिसरप्राचार्यः ए.पि.सच्चिदानन्दः प्रकृतप्रशिक्षण-कार्यशालायाः स्वरूपं निर्दिश्य भागग्राहिणः एतया कार्यशालया अवश्यं लाभान्विता भवेयुरिति शुभकामनां प्रकटितवान्। सप्ताहद्वयात्मके एतस्मिन् प्रशिक्षणकार्यक्रमे संस्थानस्य विविधपरिसरेभ्यः समायाताः ४२ छात्राः भागमगृह्णन्। आचार्या पुष्पादीक्षितमहोदया अष्टाध्यायीं बोधितवती। संस्कृत-सम्भाषणसन्देश-पत्रिकायाः सम्पादकः जनार्दनहेगडेमहोदयः, डा. एच्.वि.नागराजरावः, डा. महाबलेश्वरभट्टः, डा.सि.एस्.एस्.एन्. मूर्तिः, चन्द्रशेखरभट्टः, श्री सिएच्. के. पद्मनाभः, डा. मधुकेश्वरभट्टः च व्याकरणसम्बद्धान् विविधान् विषयान् बोधितवन्तः। प्रशिक्षणान्ते भागग्राहिणां कृते परीक्षा आयोजिता। प्रश्नोत्तरसत्रमेकम् अन्ते आयोजितमासीत् यत्र छात्राणां जिज्ञासासमाधानमकारि विद्वद्भिः। १८-१-२०१०तमे दिनाङ्के अस्याः प्रशिक्षणकार्यशालायाः सम्पूर्तिरभूत्।

## मुम्बय्यां सम्पन्नः वार्षिकः समारोहः




प्रकाशचन्द्रः, एम्.ए.बाबु, समीर-शा.सोमैया, पी.आर्.एल्.गुप्तः, गुलामदस्तगीरः, अन्ये च

१२-०३-२०१०तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य **मुम्बईपरिसरस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य** वार्षिकसमारोहः समपद्यत। तत्र मुख्यातिथिः श्रीमान् समीरशान्तिलालसोमैया (मुख्यन्यासी, सोमैया ट्रस्ट), विशिष्टातिथिः श्रीपी.आर्. एल्. गुप्तः (उपायुक्तः, मुम्बई-केन्द्रीयविद्यालयसङ्गठनम्), सारस्वतातिथिः पण्डितगुलामदस्तगीरबिराजदारः (मानसेविसङ्गठनप्रमुखः) च आसन्। पारम्परिकवैदिकमङ्गलाचरणेन ज्योतिप्रज्वालनपुरस्सरं समारोहः प्रारभ्यत। व्याकरणाचार्यः प्रकाशचन्द्रमहोदयः अतिथीनां वचस्स्वागतं व्याहरत्। परिसरकार्यकारिप्राचार्यः एम्.ए. बाबूमहोदयः अतिथिभ्यः उत्तरीयपुष्पफलैः सम्मानं विधाय वर्षं यावत् परिसरीयसमस्तकार्यजातस्य गतिविधेः प्रतिवेदनं प्रास्तौत्। प्रतिवेदनान्ते परिसरसंस्थापकस्य सद्यो दिवङ्गतस्य "शान्तिलालकर-मशीभाईसोमैया"- महापुरुषस्याऽऽत्मनः शान्त्यै निमेषद्वयं पारिषद्यैः मौनमालम्बितम्। गुर्जरभाषानुप्राणितं श्रद्धाञ्जलिगीतमपि गीतम्। मुख्यन्यासी समीरशान्तिलालसोमैया-महोदयः परिसरवार्षिकपत्रिकां विद्यारश्मिः इति-नामधेयां सगद्गदं विमोच्य सम्पादकमण्डलस्थान् डा० देवदत्तसरोदे, डा० मुरलीकृष्णः, डा० गीतादूबे, श्रीमती श्वेतासूदा इत्येतान् अध्यापकवरान् प्रशंस्य परिसरच्छात्राचार्यकर्मचारिगणं साधुवादैः सभाजितवान्। अनन्तरं परिसरस्य निखलच्छात्राचार्यकदम्बाय संस्कृतस्य श्लोकसङ्ग्रहवती सान्द्रमुद्रिका श्रीधर्मेन्द्रकान्तिलाल-पण्डित-श्रीनवनीतलालकेशवलालपरीखयोः पक्षतः मञ्चे समार्प्यत। माननीयसमीरभाईमहोदयेन वर्षद्वयादखिलभारतीयसंस्कृत-वाक्प्रतिस्पर्धायां शलाकायां लब्धविजयाय आचार्यद्वितीयवर्षच्छात्राय श्रीगणेशदेवार्याय स्वर्णरजतपदके प्रदत्ते। विशिष्टातिथेः संस्कृत-वैभवख्यापकभाषणानन्तरं सारस्वतातिथेः संस्कृतनिमित्तकसमनुष्ठितसमनुष्ठास्यमान-क्रियाकलापालपितभाषणम् अभूत्। वर्षं यावत् समायोजितासु विविधप्रतियोगितासु विजयं प्राप्तवद्भ्यः छात्रेभ्यः मञ्चस्थातिथिवरैः पुरस्काराः प्रदत्ताः। समारोहान्ते परिसरप्राचार्येण आध्यक्ष्यभाषणं, शास्त्रचूडामणिपण्डितरामरूपमिश्रमहोदयेन धन्यवादभाषणञ्च कृतम्। कार्यक्रमस्य सञ्चालनं युवविदुषा डा० मुरलीकृष्णेन समपादि। राष्ट्रगानेन आयं वार्षिकः समारोहः समाप्तिमगात्।

## शोधच्छात्राः प्रशिक्षिताः

### सम्पन्नः अनुसन्धानप्रविधिप्रशिक्षणवर्गः



ज्योतिप्रज्वालनं कुर्वन् एन्.एस्. दक्षिणामूर्तिः

रा.सं.संस्थानस्य विभिन्नेषु परिसरेषु अनुसन्धानकर्मणि रतानां शोधच्छात्राणां अनुसन्धान-कौशलसंवर्धनाय, तैः समर्पयिष्य-माण-शोधनिबन्धेषु गुणस्तरवर्धनाय च शृङ्गेरीस्थ-राजीवगान्धीपरिसरे एकविंशतिदिनात्मकः अनुसन्धानप्रविधिप्रशिक्षणवर्गः समायोजि। जून्-मासस्य तृतीयदिनाङ्कादारभ्य त्रयोविंशतिपर्यन्तं प्रवृत्ते एतस्मिन् कार्यक्रमे षट्त्रिंशत् शोधच्छात्राः प्रशिक्षणम् प्राप्नुवन्।

विकृतिसंवत्सरस्य वैशाखसितषष्ठ्यां गुरुवासरे (०३-०६-२०१०-तमे दिनाङ्के) प्रातः प्रशिक्षणवर्गोऽयं मैसूरुविश्वविद्यालयस्य आचार्यचरेण श्रीमता एन्.एस्. दक्षिणामूर्तिमहाभागेन समुदघाट्यत। उद्घाटनसमारोहे भाषमाणः दक्षिणामूर्तिमहोदयः अनुसन्धानस्य विविधप्रकारान् संवर्ण्य, 'अनुसन्धित्सुभ्यः संस्कृतभाषेयम् अक्षय्यः अनितरसाधारणश्च शेवधिः, भाषायामस्यां निगूढाः विषया अस्माभिरनुसन्धेया' इत्यभाषिषत। समारोहेऽस्मिन् आध्यक्ष्यमूढ्वा अनुसन्धातॄन् उद्बोधयन् परिसरप्राचार्यः ए.पि.सच्चिदानन्दमहोदयः शोधक्षेत्रे प्राचीनभारतीयानां योगदानं वर्णयित्वा छात्रेषु अन्वेषणशीलधिषणायाः समभिवर्धनम् आशासत।

वर्गेऽस्मिन् आचार्यः राधाकृष्णभट्टः, डा. वि.एस्. शुक्लः, आचार्यः लक्ष्मीताताचार्यः, डा. परशुरामपराञ्जपे, डा. नवीनहोळ्ळः, डा. विरूपाक्षजड्डीपालः, डा. सूर्यनारायणभट्टः, डा. सि. एस्. एस्. नरसिंहमूर्तिः, डा. आनन्दतीर्थनागसम्पिगे, डा. सुब्राय वि. भट्टः, डा. मनोजकुमारमिश्रः, डा. जि. एस्. आर्. कृष्णमूर्तिः, आचार्यः ए. पि. सच्चिदानन्दः, डा. गणेश-ईश्वरभट्टः, डा. सूर्यनारायणभट्टः, डा. मधुकेश्वरभट्टः इत्येवम् अनेके विद्वांसः विभिन्नदिनेषु विविधेषु व्याख्यानसत्रेषु छात्रान् प्रबोधितवन्तः।

विकृतिसंवत्सरस्य ज्येष्ठसितद्वादश्याम् (२३-०६-२०१०) अनुसन्धानप्रविधिप्रशिक्षणवर्गस्य समापनसमारोहः समपद्यत। मङ्गलूरुविश्वविद्यालयस्य योगविज्ञान-मानवप्रज्ञाविभागाध्यक्षः आचार्यः कृष्णभट्टवर्यः कार्यक्रमेऽस्मिन् समुपस्थितः आसीत्। प्रशिक्षणवर्गे भागग्रहीतृभ्यः अनुसन्धातृभ्यः कृष्णभट्टः प्रमाणपत्राणि व्यतरत्।

### न्यायप्रबोधनकार्यशाला




भाषमाणः प्रह्लादाचार्यः, उपविष्टाः-ए.पि. सच्चिदानन्दः, मु. विश्वनाथशास्त्री, नवीनहोल्लः च

पञ्चदशदिनात्मिका न्यायशास्त्रप्रबोधनकार्यशाला २७-१-२०१०-दिनाङ्के शृङ्गेरीपरिसरे तिम्मसमुद्र-संस्कृत-कलाशालायाः उपाचार्येण मुल्लपूडिविश्वनाथशास्त्रि-वर्येण समुद्घाटिता। उद्घाटनसत्रे समुपस्थितः तिरुपतिस्थ-रा.सं. विद्यापीठस्य भूतपूर्वकुलपतिः प्रह्लादाचार्यमहोदयः छात्रानुपादिशत् यत् विविधशास्त्रसम्बद्धान् ग्रन्थान् सम्यगवगन्तुं तर्कशास्त्रं महदुपकारकं भवतीति। परिसरप्राचार्यः एतस्मिन् अवसरे 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति वाक्यं संस्मार्य प्रकृतकार्यक्रमस्योद्देशं व्यवृणोत्। प्रारम्भे कार्यशालासंयोजकः डा. नवीनहोल्लः उपस्थितान् सभ्यान् वाक्कुसुमैः स्वागतीकृतवान्। डा. विजयराघवाचारी कार्यक्रमनिरूपणमकरोत्। श्रीश्यामसुन्दरभट्टः धन्यवादमार्पयत्।

### भगवद्गीताविषयकम् उद्बोधनम्

कर्णाटकराज्ये प्रचलतः श्रीमद्भगवद्गीताबोधनाभियानस्य अङ्गतया स्वर्णवल्लीसंस्थानस्य श्रीमद्गङ्गाधरेन्द्रस्वामिपादैः शृङ्गेरीपरिसरे २४-१-१०तमे दिनाङ्के गीताविषयकं प्रशिक्षणं प्रदत्तम्। परिसरप्राचार्यः ए.पि. सच्चिदानन्दमहोदयः स्वामिपादेभ्यः स्वागतं व्याहरत्। परिसरस्य छात्राः, अध्यापकाः इतरे पुरवासिनः नागरिकाः च प्रशिक्षणकार्यक्रमे भागमगृह्णन्। डा. गणेश-ईश्वरभट्टः कार्यक्रममिमं संयोजितवान्। भगवद्गीताभियानस्य शृङ्गेरीमण्डलस्य अध्यक्षः श्रीधरः, शृङ्गेरीस्थः श्रीप्रभाकरनायकः, शृङ्गेरी-तालूकपञ्चायदध्यक्षः श्री ए. एन्.नयनः, बी.जी.एस्. महाविद्यालयस्य प्राचार्यः के.सी. नागेशः च कार्यक्रमे समुपस्थिताः। सायङ्कालीनसत्रे श्रीस्वर्णवल्ली-संस्थानस्य मातृमण्डल्या शिक्षणसत्रं प्रवर्तितम्।

## गुरुवायूर्-परिसरे वार्षिकोत्सवः




वार्षिकोत्सवे मुख्यभाषणं कुर्वन् राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः रामानुजदेवनाथः

जनवरीमासस्य विंशतितमे अहनि परिसरस्य वार्षिकोत्सवः सम्पन्नः। समारोहस्य आध्यक्ष्यं छात्रकल्याणसमितेः अध्यक्षः निरवहत्। संस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथः मुख्यं भाषणमकार्षीत्। 'अत्र सम्यगधीत्य संस्कृतसेवां राष्ट्रसेवां च कुर्वन्तः आत्मकल्याणार्थं छात्राः प्रयतेरन्' इति छात्रानुद्दिश्य हितवचनानि तेन बोधितानि। कार्यक्रमारम्भे परिसरप्राचार्यद्वारा स्वागतवचनानि प्रस्तुतानि। परिसरस्य वार्षिकप्रतिवेदनं च निवेदितम्। केरलकलामण्डलस्य कुलपतिः आचार्यः के. जि. पौलोस्महोदयः उद्घाटनभाषणमकरोत्। 'सर्वासां भाषाणां सर्वेषां शास्त्राणां प्रवेशं संस्कृतभाषाज्ञाः अनायासेन कुर्वन्ति' इति तेन उद्घोषितम्। वार्षिकस्पर्धासु विजयिभ्यः छात्रेभ्यः पुरस्कारान् प्रदाय अन्वगृह्णन्। छात्रकल्याणसमितेः सचिवेन कृतेन धन्यवादभाषणेन सभा सम्पन्ना। तदनन्तरं छात्राणां सांस्कृतिककलाप्रतिभा सभ्यैः अक्षिसात्कृता।



## गुरुवायूर्-परिसरे राष्ट्रियसङ्गोष्ठी

गुरुवायूर्-परिसरे १६-१२-०९-दिनाङ्के सामान्यविभागे सङ्गोष्ठी समभूत्। 'केरलवर्मपषशिशराज'-महानुभावस्य समग्रचरित्रं महत्त्वं च उद्बोधितम् अतिथिरूपेण समागतेन डा. तोलूर्-शशिधरन् (त्रिशिवपेरूर्) -महाभागेन। "भाषासाहित्यम् संस्कृतिश्च" इत्यस्मिन् विषये डा. वि. जि. तम्पिमहोदयः (श्री-केरलवर्म-कलाशाला, त्रिशिवपेरूर्) मुख्यभाषणमकरोत्।

## शिक्षाशास्त्रविषयिणी सङ्गोष्ठी

गुरुवायूरपरिसरे आ. लक्ष्मीनारायणशर्मप्रमुखैः शिक्षाशास्त्रविभागीयैः १८-०१-२०१०-दिनाङ्के विशिष्टव्याख्यानं, राष्ट्रियसङ्गोष्ठी च समायोज्यत। छात्रैः मङ्गलाचरणेन समारब्धे कार्यक्रमेऽस्मिन् प्रभारी प्राचार्यः पि. जि. श्रीनिवासन्-महोदयः आध्यक्ष्यं निरवहत्, आशंसावचोभिश्च सभामुदबोधयत्। मुख्यातिथिः डा. वी. सुरेन्द्रन्-महोदयः एकविंशशताब्द्यां नवशैक्षिकप्रवृत्तयः इति विषय- माधारीकृत्य सुष्ठु भाषणमकरोत्। शृङ्गेरीस्थ-राजीवगान्धी - परिसरात् समागतः शिक्षाशास्त्रविभागस्याध्यापकः डा. गिरिधररावः शोधपत्रं समार्पयत्। विभागीयाः अध्यापकाः विविधेषु विषयेषु पत्राणि प्रास्तुवन्। डा. के.के. हर्षकुमारः कृतज्ञतावचांसि न्यवेदयत्। डा. वेङ्कटरमणभट्टः सभां समचालयत्। अन्ते देशीयगानेन सभा समाप्तिमगात्।



निर्माणाधीनं गरलीपरिसरभवनम्



मञ्चे विराजमानाः - के. के. हर्षकुमार्, पि. जि. श्रीनिवासन्, गिरिधररावः, लक्ष्मीनारायणशर्मा, वेङ्कटरमणभट्टः अन्ये च।

# संस्कृतशिक्षकप्रशिक्षणवर्गाः सम्पन्नाः

राष्ट्रियसंस्कृतसंस्थानेन संस्कृतमाध्यमेन संस्कृतशिक्षणकौशलं भाषादक्षतां च वर्धयितुम् एकविंशतिदिनात्मकस्य आवासीयस्य संस्कृत-शिक्षकप्रशिक्षणवर्गस्य आयोजनं राष्ट्रस्तरे चतुर्षु स्थानेषु कृतम्। प्रशिक्षणार्थिनां चयनाय ११.४.२०१०-तमे दिनाङ्के प्रशिक्षणपूर्वपरीक्षणम् आयोजितम्। परीक्षणेऽस्मिन् १९१८ अभ्यर्थिनः भागं गृहीतवन्तः। तेषु ६९१ जनाः उत्तीर्णताम् अलभन्त। तदनु मई-जूनमासयोः प्रवृत्तेषु चतुर्षु आवासीय-प्रशिक्षणवर्गेषु ४२८ प्रशिक्षार्थिनः समायाताः। अन्ते च प्रशिक्षणोत्तरपरीक्षणे ३५५ शिक्षार्थिनः उत्तीर्णाः सञ्जाताः। प्रशिक्षणवर्गस्य विवरणम् इत्थं वर्तते–

| स्थानम् | दिनाङ्कः | प्रतिभागिनः | उत्तीर्णाः |
|---|---|---|---|
| गुरुवायूरपरिसरः | १९.५.२०१० तः ८.६.१०१० | ८४ | ७६ |
| आद्यापीठदक्षिणेश्वर-रामकृष्णसंघः, कोलकाता | २३.५.२०२० तः | १४३ | १२५ |
| जयपुरपरिसरः | ७.६.२०१० तः २७.६.२०१० | १०६ | ७० |
| लखनऊपरिसरः | १०.६.२०१० तः | ९५ | ८४ |

## गुरुवायूर्-परिसरे प्रशिक्षणवर्गः

१९-५-२०१० तः ८-६-२०१० पर्यन्तं गुरुवायूरपरिसरे प्रवृत्ते अनौ.सं.शि. प्रशिक्षणवर्गे विभिन्नराज्येभ्यः समागताः उपशतं प्रशिक्षणार्थिनः भागमगृह्णन्। प्रशिक्षणवर्गोऽयं १९-५-२०१०तमे दिनाङ्के कालटीस्थ-श्रीशङ्कराचार्य-संस्कृतविश्वविद्यालयस्य सङ्घायप्रमुखेन आचार्येण जि. गङ्गाधरन्-नायर्-महोदयेन समुदघाट्यत। उद्घाटनभाषणावसरे गङ्गाधरन्महोदयः संस्कृत-सम्भाषणोद्यमस्य संक्षिप्तमितिहासं स्मारयित्वा विभिन्नक्षेत्रेषु उद्योगरताः, निरुद्योगिनः, गृहस्थाः, गृहिण्यो वा, युवानः वृद्धाः वा संस्कृताध्ययने आसक्तिमन्तः समाजस्य सर्वसदस्याः अनौपचारिकसंस्कृतशिक्षणेन लाभान्विता भवेयुः इति अवादीत्। कार्यक्रमस्य आध्यक्ष्यं निर्वहता परिसरप्राचार्येण के.टी. माधवन्-महोदयेन अभिप्रेतं यत् 'संस्कृताध्ययनं कर्तुम् अभिलषतां संख्या भूयसी वर्तते। स्वबाल्ये छात्रजीवने वा संस्कृतं पठितुं ये न शक्तवन्तः परमधुना संस्कृतं ज्ञातुमिच्छन्ति, तादृशानां संस्कृताभिमानिनां कृते अनौ.सं.शिक्षणं महदुपकारकं भवेत्' इति। श्रीशङ्कराचार्यविश्वविद्यालयस्य 'संस्कृतप्रचारणपद्धतिः' इत्यस्याः योजनायाः मुख्यसंयोजकः डा. धर्मराजः अडाट् शुभाशंसनम् अकरोत्। संस्कृतवाङ्मयस्य वैशिष्ट्यविवरणपुरस्सरं एतादृशप्रशिक्षणकार्यक्रमस्य आयोजनस्य आवश्यकतां समसूचयत्। गुरुवायूरपरिसरस्य शिक्षाशास्त्रविभागस्य आचार्यः ल.ना. शर्मा, अ.वे. आचार्यः अनौ.सं.शिक्षणस्य केरलप्रान्तसंयोजकः डा. सुब्रह्मण्यशर्मा च प्रशिक्षणवर्गं संयोजितवन्तौ। उद्घाटनसत्रे कार्यक्रमनिरूपणं डा. सुब्रह्मण्यशर्मणा, स्वागतभाषणं आचार्येण लक्ष्मीनारायणशर्मणा, धन्यवादार्पणं मुख्यालये मुक्तस्वाध्यायपीठे कार्यरतेन सहायकाचार्येण वेङ्कटेशमूर्तिना च कृतम्। श्री शं.सं. विश्वविद्यालयस्य डा. एम्.वि. नटेशः, डा. गिरिधरराव-डा. सुशान्तराय-उण्णिकृष्ण-सुधीश-प्रभृतयः अध्यापकाः प्रशिक्षणार्थिनः परिसरीयसदस्याश्च कार्यक्रमे समुपस्थिताः आसन्।




उद्घाटनभाषणं कुर्वन् गङ्गाधरन्-नायर्

सप्ताहत्रयात्मकं प्रशिक्षणं ८-६-१०तमे दिनाङ्के पूर्वाह्ने सम्पन्नतामगात्। समापनसत्रे सारस्वतातिथिरूपेण समुपस्थितः तिरुपतिस्थ-रा.सं.विद्यापीठस्य कुलपतिचरेण आचार्येण डि. प्रह्लादाचार्यवर्येण संस्कृतभाषाविषयकैः तथ्यविशेषैः छात्राः प्राबोध्यन्त। विशिष्टातिथिरूपेण समाहूतेन कालटीस्थ-संस्कृतविश्व-विद्यालयस्य आचार्येण रामकृष्णभट्टमहोदयेन 'संस्कृतशिक्षणम् उत्तमसंस्कारं प्रदद्यात्, सुदृढं सामरस्यपूर्णं राष्ट्रं निर्मातुं जनाः संस्कृतं पठेयुः, अत्र प्रशिक्षिताः उत्तमाः शिक्षका भूत्वा संस्कृतसेवां कुर्युः' इति अभिप्रेरणा दत्ता। परिसरप्राचार्यस्य के.टी.माधवन्महोदयस्य आध्यक्ष्ये प्रवृत्ते एतस्मिन् समारोपकार्यक्रमे प्रशिक्षणार्थिनः आनन्दानुभूतिं प्रकटितवन्तः। प्रशिक्षकाणां प्रतिनिधीभूय डा. एम्.वी.नटेशः भाषणं कृत्वा प्रशिक्षणवर्गविषयकं अनुभवं प्रकटितवान्। डा. सुब्रह्मण्यशर्मा सभां समचालयत्। आचार्यः च.ल.ना. शर्मा प्रशिक्षणवर्गायोजने उपकृतवतः सर्वान् स्मृत्वा कृतज्ञतां न्यवेदयत्।




समापनसत्रे सारस्वतातिथिं प्रह्लादाचार्यं सम्मानयन् प्राचार्यः के.टी. माधवन्

## कोलकातायां शिक्षकप्रशिक्षणवर्गः

कोलकातास्थ-दक्षिणेश्वर-रामकृष्णसङ्घ-आद्यापीठस्य अन्नदाविद्यामन्दिरे राष्ट्रियसंस्कृतसंस्थानस्य एकविंशतिदिवसीयः आवासीयसंस्कृतशिक्षकप्रशिक्षणवर्गः २२.५.२०१० दिनाङ्कात् १२.६.२०१० दिनाङ्कं यावत् प्राचलत्। उद्घाटनसमारम्भे आद्यापीठस्य मुख्यसम्पादकः ब्रह्मचारी मुरालभाई-वर्यः रिषडाप्रेममन्दिरस्य निर्गुणानन्दस्वामी, दामोदराश्रमचरणदण्डिस्वामी, रामकृष्णसङ्घस्य सङ्घनेत्री च उपस्थिताः आसन्। कार्यक्रमे मुरालभाईवर्येणोक्तं यत् 'संस्कृतनिष्ठराष्ट्रमानसनिर्माणाय संस्थानस्य अयं प्रकल्पः परमसहायकः स्यात्। भारतस्य प्रतिपञ्चायतम् एकैकमनौपचारिक-संस्कृतशिक्षणकेन्द्रं भवेत्। प्रतिराज्यं च कानिचन स्थायिकेन्द्राणि स्युः'। इतरैः अपि अतिथिभिः विविधैः उदाहरणैः परिसङ्ख्यानैश्च सामान्यजनानां लाभाय कार्यक्रमस्यास्य महत्त्वं प्रतिपादितम्।

प्रातः पञ्चवादनतः रात्रौ दशवादनपर्यन्तं नवभिः कालांशैः वर्गदिनचरी विभक्ता आसीत्। आधुनिकतमशैल्या विविधोपकरणानां साहाय्येन कृताध्यापनेन वर्गार्थिनः भृशम् उपकृताः। वर्गः अतीव रोचकः उत्साहप्रदश्च आसीत्। वर्गान्ते लिखितमौखिकपरीक्षे आयोजिते। १४३ प्रतिभागिनः परीक्षां लिखितवन्तः। तेषु १२६ परीक्षार्थिनः समुत्तीर्णाः।

जूनमासस्य ११ दिनाङ्के सायङ्काले वर्गस्य समापन-समारोहः आयोजितः। तत्र रिषडास्थप्रेममन्दिरस्य अध्यक्षस्य देवानन्द-ब्रह्मचारिस्वामिनः आध्यक्ष्ये पश्चिमबङ्गशासनस्य उच्चशिक्षा-सचिवः, डा. स्वपन-सरकारः विशिष्टातिथित्वेन, बङ्गीयसंस्कृत-शिक्षापरिषदः सचिवः डा. धीरेन्द्रनाथः सारस्वतातिथिरूपेण च वर्गार्थिनः उद्बोधितवन्तौ। आद्यापीठपरिसरे नवनिर्मितस्य पञ्चाट्टात्मकस्य विशालभवनस्य अट्टमेकं राष्ट्रियसंस्कृत-संस्थानस्य संस्कृतशिक्षकप्रशिक्षणकार्यक्रमार्थम् उत्सर्गीकरोमीति समारोपकार्यक्रमस्य प्रधानातिथिना दक्षिणेश्वररामकृष्णसङ्घ-आद्यापीठस्य प्रधानसचिवेन ब्रह्मचारिमुरालभाईवर्येण उद्घोषणा कृता। वर्गस्य प्रशिक्षणप्रमुखः डा. तन्मयकुमारभट्टाचार्यः सम्पूर्णकार्यक्रमस्य इतिवृत्तं न्यवेदयत्। अन्ते च वर्गशिक्षकस्य डा. नारायणदाशस्य धन्यवादाविष्कारेण प्रशिक्षणकार्यक्रमोऽयं सुसम्पन्नतां गतः।



समुपस्थिताः मुरालभाईप्रभृतयः विद्वांसः

## जयपुरे शिक्षक-प्रशिक्षणवर्गः

जयपुरपरिसरे ०७-०६-१०-दिनाङ्कतः २७-०६-१०-दिनाङ्कावधि एकविंशतिदिवसीयस्य अनौपचारिक-संस्कृतशिक्षक-प्रशिक्षणस्य समायोजनमभूत्। वर्गेऽस्मिन् पञ्जाब-हरियाणा-दिल्ली-राजस्थान-गुजरात-मध्यप्रदेशराज्येभ्यः १०६ प्रतिभागिनो भागमगृह्णन्। एते प्रतिभागिनः ११-०४-२०१०तमे दिनाङ्के समायोजिते प्रशिक्षणपूर्वपरीक्षणे चिताः।

प्रशिक्षणान्ते अर्हतानिर्धारणपरीक्षा आयोजिता। आहत्य २७ प्रशिक्षणार्थिनः द्वितीयदीक्षां ४४ प्रशिक्षणार्थिनः प्रथमदीक्षां पाठयितुमर्हतां प्राप्नुवन्।



समापनसत्रे भाषमाणः हरिराम-आचार्यः
मञ्चे-वाई.एस्. रमेशः, निरञ्जनशर्मा, चन्द्रकान्तवरठे, अर्कनाथ चौधरी, सुदेशकुमारशर्मा च

२६-०६-१०तमे दिनाङ्के आयोजिते समापनसमारोहे राजस्थानसर्वकारस्य जनस्वास्थ्याभियान्त्रिकीविभागस्य उपशासन-सचिवः श्रीनिरञ्जनशर्मा मुख्यातिथिपदं अलमकरोत्। राष्ट्रपतिपुरस्कृतः हरिरामाचार्यः सारस्वतातिथिः, जयपुरदूरदर्शन-केन्द्रस्य सहायककेन्द्रनिदेशकः डॉ. चन्द्रकुमारवरठेमहोदयः विशिष्टातिथिः चास्ताम्। परिसरप्राचार्यः अर्कनाथचौधरीमहोदयः समारोहस्य अध्यक्षतां निरवहत्। सर्वेभ्यः प्रशिक्षणार्थिभ्यः प्रतिभागिताप्रमाणपत्राणि प्रदत्तानि। अर्कनाथचौधरी, डॉ. वाई.एस्. रमेशः, डॉ. श्रीधरमिश्रः, डॉ. रमाकान्तपाण्डेयः, डॉ. शिवचरणशर्मा, डॉ. रघुवीरप्रसादशर्मा, जितेन्द्रथदानी, सुश्रीः प्रतिमा एते प्रशिक्षकाः स्वीयवैदुष्येण प्रशिक्षणार्थिनः समुपाकुर्वन्। ०७-०६-२०१०तमे दिनाङ्के राजस्थानसर्वकारस्य भूजलप्रबन्धनाधिकारिणः श्रीसोमनाथमिश्रस्य मुख्यातिथित्वे उद्घाटनसमारोहः समपद्यत। राष्ट्रपतिसम्मानितः देवर्षिकलानाथशास्त्री सारस्वतातिथिः आसीत्। परिसरप्राचार्यः अर्कनाथचौधरी अध्यक्षपदं व्यभूषयत्। शिक्षाशास्त्रविभागाध्यक्षः आ. सुदेशकुमारशर्मा अस्य वर्गस्य संयोजनम् अकरोत्।

## सेवाकार्यम् जयपुरे

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य राष्ट्रिय-सेवायोजनायाः (N.S.S.) घटकेन २५-१२-२००९ तः ३१-१२-०९-पर्यन्तं विशेष-सेवाशिविरम् आयोजितमासीत् यत्र परिसरीयाः ५० छात्राः सोत्साहं भागम् अगृह्णन्। डा. कमलेशकुमारजैनमहोदयस्य मार्गदर्शने छात्रदलप्रमुखस्य मुकुलपारीकस्य नेतृत्वे ते छात्राः जयपुरस्थ-जगन्नाथपुरी-नामके अविकसितप्रदेशे विविधानि सेवाकार्याणि अकुर्वन्। शिबिरस्य प्रारम्भे मध्ये अन्ते च विभिन्न-प्रसङ्गेषु श्रीमहावीरप्रसाद-आ. फतेहसिंह-मनमोहनगुप्त-डा. ओम् प्रकाशभडाना-डा. अरुणाशर्म-डा. सतीशचन्द्र- कीलावत-आ. अर्कनाथचौधरी-प्रभृतिभिः सेवाकार्याणां महत्त्वमधिकृत्य छात्राः उद्बोधिताः।

## जैववैविध्यवर्षम् उपलक्ष्य कार्यक्रमः समनुष्ठितः

प्रकृतवर्षम् जैववैविध्यवर्षत्वेन भारतशासनेन बह्वीभिः अन्ताराष्ट्रियसंस्थाभिः च उद्घोषितमस्ति। एतदभिलक्ष्य भारतशासनस्य निर्देशानुसारं रा.सं.संस्थानेना परिसरेषु छात्राणां कृते संस्कृतसाहित्ये जीववैविध्यम् इति विषयमधिकृत्य स्पर्धाः आयोजिताः। विजयिभ्यः छात्रेभ्यः पुरस्काराश्च प्रदत्ताः। पुरी-परिसरे २४.०२.२०१०-दिनाङ्के आयोजितयोः भाषण-निबन्धलेखनप्रतियोगितयोः इमे पुरस्कारभाजः अभवन्-

निबन्धलेखनस्पर्धायां प्रथमादिक्रमेण मानसरञ्जनसाहुः, शुभसुन्दरपण्डा, सुब्रतकुमारषडङ्गी इतीमे; भाषणस्पर्धायां सौम्यरञ्जनषडङ्गी, सत्यनारायणपण्डा, अमरज्योतिपट्टनायकः च।

**परोपकरणं येषां जागर्ति हृदये सताम्। नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे पदे।।** चाणक्य. ७.१४

## कालियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य द्वितलभवनोद्घाटनोत्सवः




भाषमाणः स्वामी अक्षतानन्दमहाराजः। (वामतः) रामकृष्णपाण्डेयपरमहंसः, कुलपतिः रा.व. त्रिपाठी, नीतिशसेनगुप्तः, हरिपदमाइतिः, पृष्ठतः स्थितः किंशुकसाहा च।

०१-०२-२०१०तमे दिनाङ्के कालियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य नवनिर्मित-द्वितलभवनस्य उद्घाटनोत्सवः भव्यतया परिचालनासमितिसभाध्यक्षस्य डॉ. नीतिशसेनगुप्त-महोदयस्य अध्यक्षतायां समनुष्ठितः। उत्सवेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आ. राधावल्लभत्रिपाठिमहाभागः मुख्यातिथिरूपेण समुपस्थितः आसीत्। पश्चिमवङ्गेषु एकस्मिन् प्रान्तभागे उत्कलप्रदेशस्य सीमान्तर्वर्तिनि क्षेत्रे पण्डितविद्यासागरस्य पावनजन्मभूमिभागे सारस्वतसाधकस्य वङ्किमचन्द्रस्य कर्मक्षेत्रे प्राकृतिकशोभामण्डिते स्थाने अवस्थापिते संस्कृतमहाविद्यालये पदार्पणं कृत्वा धन्याः कृतकृत्याः च वयं सञ्जाताः इत्याशयं कुलपतिः प्राकटयत्। तेनेदमपि उक्तं यत् 'संस्कृतशिक्षाया अध्ययनप्रसारविधौ इयं भूमिः सुप्रसिद्धा। अयं विद्यालयः प्रवर्धताम् इति। डॉ. हरिपदमाइतिः मुख्यवक्तृत्वेन, डॉ. असीमकुमारमान्ना विशिष्टातिथित्वेन, काथिरामकृष्णमिशन् संस्थायाः परमपूजनीयः स्वामी अक्षतानन्दमहाराजश्च सम्मानिताथित्वेन समुपस्थाय संस्कृतभाषायाः महत्त्वविषये सम्यगुद्बोधितवन्तः। महाविद्यालयस्य प्राचार्यः रामकृष्णपाण्डेय-परमहंसः अतिथिपरिचयपुरःसरं स्वागतभाषणं कृतवान्। कुलपतिमहोदयस्यागमनेन छात्राः, अध्यापकाः कर्मचारिणः, संस्कृतानुरागिणः, छात्राभिभावकाः, ग्रामवासिनश्च आनन्दिताः सञ्जाताः। विद्यालयस्य भूमिदातुः विक्रमकिशोरसाहुमहोदयस्य प्रतिमूर्त्यावरणोन्मोचनं काँथि-अनुमण्डलाधिकारिणां रणधीरकुमारमहोदयेन सम्पादितम्। कार्यक्रमम् अध्यापकः किंशुक-साहा संयोजितवान्। अन्ते छात्रैः प्रदर्शितं सङ्गीतनृत्यादिकं सर्वजनप्रशंसितमभवत्।

## अभिनन्दनम्

**नवनियुक्तिः**

| नाम | पदम् | परिसरः |
|---|---|---|
| डा. राणी-दाधीचः | अनुदेशिका | मुख्यालयः |
| अञ्जुमिश्रा | सहा. ग्रन्थपाला | गरली |
| श्री योगेश छोलकः | सहा. ग्रन्थपाला | शृङ्गेरी |

## पूर्वशिक्षाचार्यपरीक्षा प्राक्शोधपरीक्षा च सम्पन्ना।

जूनमासस्य नवदशे दिनाङ्के (१९-६-१०) रा. सं. संस्थानेन पूर्वशिक्षाचार्यपरीक्षा (P.S.A.T), प्राक्शोधपरीक्षा (P.R.T) च आयोजिता। एतयोः परीक्षयोः परिणामः संस्थानस्य विश्वव्यापिजालपुटे (www.sanskrit.nic.in इत्यत्र) द्रष्टुमर्हन्ति।

## श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालये द्विदिवसीयशास्त्रीयालोचनाचक्रम्



कोलकातायां राष्ट्रियसंस्कृतसंस्थानसम्बद्धे श्रीसीताराम-वैदिक-आदर्श-संस्कृतमहाविद्यालये विविधशास्त्राण्यधिकृत्य मार्चमासस्य चतुर्थपञ्चमदिवसयोः आलोचनाचक्रं समायोजितम्। डा. बुद्धेश्वरषडङ्गी-डा. कौशिकमालाकारः इत्यनयोः संयोजनायामायोजितेऽस्मिन् आलोचनाचक्रे ६० शोधप्रबन्धाः प्रतिभागिभिः समुपस्थापिताः। काव्यकारण-काव्यलक्षणरससूत्रविचार-लक्षणा-ध्वनि-भाषापरिवार-रवीन्द्रगीतवैभवादिविषये पर्यालोचितानि शास्त्रीयतत्त्वानि प्रेक्षकाणां मनोरञ्जनाय अकल्पन्त। विभिन्नसत्रेषु डा. अपराचक्रवर्ती, डा. गौरीभट्टाचार्या, श्री-शान्तनुचक्रवर्ती, पृथ्वीरायः इत्यादयः अनेके विद्वांसः आलोचनायाः वैशिष्ट्यं प्रकाशितवन्तः।

*शृङ्गेरीपरिसरे*

## वाग्वर्धिनी-महोत्सवः आयोजितः

जनवरीमासस्य २४-२५-दिनाङ्कयोः शृङ्गेरीस्थ-रा.गा.परिसरे वाग्वर्धिनीमहोत्सवः परिपालितः। मैसूरुविश्वविद्यालयस्य विभागाध्यक्षचरः आचार्यः वि.डि. हेगडेमहोदयः कार्यक्रममेनम् उद्घाट्य सभां सम्बोधितवान्। विविधाः स्पर्धाः एतदुत्सवाङ्गतया समायोजिताः। विद्वान् शिवकुमारः (हैदराबाद्) अमरकोषमाधारीकृत्य अवधानकार्यक्रमं प्रदर्शितवान्। परिसरच्छात्रैः 'गोकुलनिर्गमनम्' इत्येकं नाटकम् अभिनीय प्रदर्शितम्। कार्यक्रमस्य द्वितीये दिने सङ्गीतसारस्वतम् इति कार्यक्रमः शारदाश्रीलक्ष्मीभ्यां प्रस्तुतम्। अस्मिन्नवसरे छात्रैः प्रदर्शिताः यक्षगानादिसांस्कृतिककार्यक्रमाः जनमनोरञ्जकाः आसन्। परिसरप्राचार्यस्य आध्यक्ष्ये प्रवृत्ते समापनसत्रे आन्ध्रगीर्वाणविद्यापीठस्य प्राचार्यचरः आचार्यः दोर्बलप्रभाकरशर्मा समुपस्थाय छात्रान् अभ्यनन्दत्।



### अनौपचारिकसंस्कृतशिक्षणम्

संस्कृतभाषायाः संवर्धनार्थं राष्ट्रियसंस्कृतसंस्थानेन विधीयमानेषु बहुविधप्रयत्नेषु अनौपचारिकसंस्कृतशिक्षणमपि विशिष्टं महत्त्वमावहति। अनेन माध्यमेन अनाघ्रातसंस्कृताः अपि क्रमशः संस्कृतस्य शास्त्रीयस्वरूपम् अवगच्छेयुः, तस्माच्च लाभान्विताः भवेयुः इति आशयेन अखिलभारतस्तरे कार्यमिदं प्रवर्तते। २००९-२०१०-तम-शैक्षिकसत्रस्य प्रथमचक्रे ५९९ तथा च द्वितीयचक्रे ४८९ केन्द्राणि सम्पूर्णराष्ट्रे प्रवृत्तानि। इत्थम् आहत्य १०८८ केन्द्रेषु ३४७०६ अध्येतारः कार्यक्रमेऽस्मिन् भागं गृहीतवन्तः। अध्येतृषु छात्राः अध्यापकाः कृषकाः व्यवसायिनः, कर्मचारिणः, गृहिण्यः इत्यादिरूपेण समाजस्य विविधवर्गीयाः सम्मिलिताः सन्ति। देशस्य विभिन्नभागेषु प्रवृत्तानां शिक्षणकेन्द्राणां कतिचनचित्राणि इह अवलोकयन्तु-






## आगामिनि वर्षे शिक्षाशास्त्रि-शिक्षाचार्य कक्षयोः विद्यावारिधौ च प्रवेशाय संस्थात्रयस्य सामान्य-प्रवेश-परीक्षा (Common Entrance Test) भविष्यति।

विदितमेव समेषां यत् एतावत् पर्यन्तं राष्ट्रियसंस्कृतसंस्थानेन, नवदेहलीस्थ-श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विद्यापीठेन, तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठेन च शिक्षाशास्त्रि-शिक्षाचार्य-प्रशिक्षणकक्षयोः विद्यावारिधौ च प्रवेशाय स्वीय-स्वीय-विश्वविद्यालयस्य पृथक्पृथक् प्रवेशपरीक्षा आयोज्यते स्म इति। अग्रिमवर्षतः उपर्युक्तानां त्रयाणां संस्कृतमानितविश्वविद्यालयानां सामान्य-प्रवेश-परीक्षायाः (C.E.T.) आयोजनं भविष्यति। एतेन आयोजकानां, छात्राणां च महत् सौकर्यं भवेदिति सम्भाव्यते। यतो हि पूर्व-शिक्षाशास्त्रिपरीक्षा (PSST) नाम्ना, पूर्वशिक्षाचार्यपरीक्षा (PSST)-नाम्ना च एतावत् पर्यन्तम् एभिः विश्वविद्यालयैः पृथक् पृथक् आयोजितयोः स्पर्धात्मिकयोः एतयोः परीक्षयोः निमित्तं छात्रैः पृथक् पृथक् आवेदनपत्रं, शुल्कं च देयं भवति स्म, कुत्र प्रवेशं लभेयमिति आशङ्कायां त्रिषु अपि स्थानेषु छात्रैः आवेद्यते सम, तेन च परीक्षालेखनाय गमनागमनादिव्ययोऽपि छात्रस्य अधिक एव भवति स्म। किन्तु अधुना सङ्कल्पितया सामान्यप्रवेशपरीक्षया छात्राः एकां परीक्षां विलिख्य निश्चिन्ताः भवितुं शक्नुयुः। आयोजकानां तु आयोजनव्यवस्थायाः मूलभूतव्ययः, श्रमः च विभज्य गच्छेत्। परीक्षायाः गुणस्तरः, प्रविविक्षूणां छात्राणां गुणस्तरः च वर्धेत इत्यपि परिभावयन्ति विज्ञाः। वैद्यकीयशिक्षणक्षेत्रे, प्रौद्योगिकीविद्याक्षेत्रे च एतादृश-सामान्यप्रवेशपरीक्षा-परिपाटी बहोः कालात् अनुपाल्यते इति तु जानीम एव। संस्कृतक्षेत्रे ऐदम्प्राथम्येन एतादृश्याः सामान्यप्रवेश-परीक्षायाः सङ्कल्पः साकारतामेष्यति। **२०१०-२०११ वर्षे** (२०११-२०१२ शैक्षिकसत्रे प्रविविक्षूणां कृते) **राष्ट्रियसंस्कृतसंस्थानेन**, **२०११-२०१२ वर्षे** (२०१२-२०१३-शैक्षिकसत्रे प्रविविक्षूणां कृते) **तिरुपतिस्थ-राष्ट्रियसंस्कृविद्यापीठेन**, **२०१२-२०१३ वर्षे** (२०१३-२०१४-शैक्षिकसत्रे प्रविविक्षूणां कृते **नवदेहलीस्थश्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठेन** च एषा सामान्यप्रवेशपरीक्षा आयोजयिष्यते।

## नूतनशैक्षिकसत्रस्य ( २०१०-२०११ )
## परीक्षाविषयिणी सम्भावितसमयसारिणी

▶ **स्थानीयपरीक्षा** – मार्चमासस्य अन्तिमसप्ताहे

[प्रथमा (प्र.व.) प्रथमा (द्वि.व,)-
पूर्वमध्यमा (प्र.व.)-उत्तरमध्यमा
(प्र.व.)/ प्रा.शा. (प्र.व.)-च्छात्राणां कृते।]

▶ **केन्द्रीयपरीक्षा** – एप्रिलमासस्य द्वितीयसप्ताहे

[प्रथमा (तृ.व.)-पूर्वमध्यमा (द्वि.वर्ष)-
उत्तरमध्यमा (द्वि.व.)/प्रा.शा. (द्वि.व.)-च्छात्राणां,
परिसरादन्यत्र (आदर्शमहाविद्यालयादिसंस्थासु)
अधीयानानां शास्त्रि-आचार्यच्छात्राणां,
परिसरीय-शास्त्रिद्वितीयतृतीयवर्षयोः, परिसरीया-
चार्यद्वितीयवर्षस्य छात्राणां च कृते।]

▶ **सत्रार्धपरीक्षा** (Semister Exam.) **I** – दिसम्बरमासस्य द्वितीयसप्ताहे

,, **II** – २०११ मईमासस्य द्वितीयसप्ताहे

[परिसरीय-शास्त्रिप्रथमवर्षस्य,
आचार्यप्रथमवर्षस्य च छात्राणां कृते]

▶ **संयुक्त/सामान्यप्रवेशपरीक्षा** (C.E.T)-

(i) शिक्षाशास्त्रिकक्षानिमित्तम् – २०११ मईमासस्य प्रथमसप्ताहे

(ii) शिक्षाचार्यनिमित्तम् – २०११ जूनमासस्य प्रथमसप्ताहे

(iii) विद्यावारिधिनिमित्तम् – २०१२ जूनमासस्य द्वितीयसप्ताहे

## छात्रवृत्तिसमाचारः

रा.सं.संस्थानं प्रतिवर्षं समग्रदेशे विभिन्नस्तरेषु संस्कृतम् अधीयानानां कृते छात्रवृत्तिवितरणं करोति। तत्र विभिन्नस्तरेषु छात्रवृत्तेः निर्दिष्टराशिः इत्थमस्ति-

| | |
|---|---|
| नवमदशमकक्षयोः स्तरस्य | - रू. २५०/- |
| ११,१२ कक्षयोः/प्राक्शास्त्रिस्तरस्य | - रू. ३००/- |
| शास्त्रि/स्नातकस्तरस्य | - रू. ४००/- |
| आचार्य/स्नातकोत्तरस्तरस्य | - रू. ५००/- |
| विद्यावारिधिस्तरस्य | - रू. १५००/- |

२००९-२०१०-वर्षे प्रदत्तछात्रवृत्तेः विवरणम् इह अवलोक्यताम्-

स्वीकृतराशिः- ५७५ लक्षरूप्यकाणि

प्राप्तानाम् आवेदनपत्राणां सङ्ख्या - १०२५१९

लाभान्वितछात्राणां सङ्ख्या - २७२८०

लाभान्वितेषु पारम्परिक-धारायाः छात्राणां सङ्ख्या - १३४७

आधुनिकधारायाः छात्राणां सङ्ख्या - १५९३३

**२०१०-२०११ वर्षस्य छात्रवृत्तिनिमित्तं विज्ञापनं रा.सं. संस्थानस्य वि.व्या.जालपुटे (www.sanskrit.nic.in), समाचारपत्रेषु वा अक्टोबरमासस्य प्रथमसप्ताहे प्रकटयिष्यते।**

## उपपञ्चसहस्रम् अभ्यर्थिनः आसन्
## पू.शि.शा. परीक्षायाम् (PSST. 2010)

१५-५-२०१० तमे दिनाङ्के राष्ट्रस्तरे रा.सं. संस्थानेन अयोजिताया: पूर्वशिक्षाशास्त्रिप्रवेशपरीक्षानिमित्तम् उपपञ्चसहस्त्रं जनाः आवेदितवन्तः आसन्। तेषु ४८९१ जनाः परीक्षां लिखितवन्तः। परीक्षां लिखितवत्सु तेषु ३३५३ पुरुषाः, १५३८ महिलाश्च आसन्। परीक्षापरिणामः ०९-०६-२०१० तमे दिनाङ्के उद्घोषिता। परीक्षायाम् उत्तीर्णानां विवरणम् इत्थमस्ति-

पुरुषाः- ११८९

महिलाः- ५५०

तेषु पारम्परिकधारायाः छात्राः - १६८२

आधुनिकधारायाः छात्राः - ४३५

## सेवाकालं पूरितवती

मुख्यालये कृतकार्या श्रीमती कञ्चन-महेन्द्रू परीक्षाविभागस्य सहा. कुलसचिवपदात् ३१-५-२०१० दिनाङ्के सेवाविरता अभूत्।

## वार्षिकपरीक्षापरिणामः घोषितः

रा.सं. संस्थानेन गत-एप्रिल् मईमासयोः आयोजितानां वार्षिकपरीक्षाणां पीरणामः जून्मासे प्रकटितः।

विभिन्नासु परीक्षासु उपविष्टानाम् उत्तीर्णानां च सङ्ख्याविषयकं विवरणम् अधो दृश्यताम्-

| कक्षा | परीक्षार्थिनां संख्या | उत्तीर्णानां संख्या | उत्तीर्णताप्रतिशतम् |
|---|---|---|---|
| प्रथमा | ३११ | १९४ | ७६.२१% |
| पूर्वमध्यमा | १०४२ | ८७० | ८३.४९% |
| उ०म० | ८५० | ७१३ | ८३.८८% |
| प्राक्शास्त्री | १०७३ | ७५५ | ७०.३६% |
| शास्त्री-I | १९८६ | १५५२ | ७८.१४% |
| शास्त्री-II | १४२४ | १२५२ | ८७.९२% |
| शास्त्री-III | ११४५ | ९९२ | ८६.६३% |
| आचार्य-I | १३७४ | १२७४ | ९२.७२% |
| आचार्य-II | १०१२ | ९१० | ८९.९२% |
| शि.शा. | ७४६ | ७४२ | ९९.४६% |
| शि.आ. | ४६ | ४६ | १००% |

## आगामि-कार्यक्रमाणां सम्भावितं तिथिपत्रकम्

| | |
|---|---|
| १-७-१० | शैक्षिकसत्रारम्भः |
| १५-७-१० तः ३१-७-१० | छात्राणां प्रवेशप्रक्रिया |
| २२-८-१० | डा. वि. राघवन्-स्मृतिव्याख्यानमाला (चेन्नैनगरे) |
| २३-८-१० | मुख्यालये कविसपर्या, विद्वत्सपर्या च |
| २४-८-१० | संस्कृतदिवसः (मुख्यसमारोहः) |
| २५, २६-८-१० | संस्कृतसप्ताहाङ्गतया स्पर्धाः |
| २७-८-१० | संस्कृतसप्ताहस्य सम्पूर्तिः |
| ६-९-१० | भोपाले राधाकृष्णन्-स्मृतिव्याख्यानमाला |
| ७-९-१० | लखनऊ-परिसरे पं० गोपीनाथकविराज-स्मृ. व्याख्यानमाला |
| ३-१०-१० | जयपुरे आ. हीरालालजैन-स्मृतिव्याख्यानमाला |
| १५-१०-१० | संस्थानस्य स्थापनादिवसः |
| २५, २६, २७-१०१० | नवदेहल्यां कौमुदीमहोत्सवः |
| ७-११-१० | जयपुरे म.म. मधुसूदन-ओझा-स्मृ० व्याख्यानमाला |
| १५ तः ३०-११-१० | राज्यस्तरीय-शास्त्रीयस्पर्धाः |
| २७-१२-१० | गुरुवायूरु-परिसरे युवमहोत्सवः |
| ७ तः १०-१-२०११ | बेङ्गलूरुनगरे विश्वसंस्कृतपुस्तकमेला अखिलभारतीय-शास्त्रीयस्पर्धाः, शलाकापरीक्षाः, कविभास्करी |
| १७-१-११ | शृङ्गेर्यां राजीवगान्धीस्मृतौ-अन्ताराष्ट्रिय-व्याख्यानमाला |
| २तः २५-२-११ | कोलकातायां पं. गौरीनाथशास्त्रि-स्मृतिव्याख्यानमाला<br>गुरुवायूरपरिसरे पं. कुरियाक्कोसस्मृतिव्याख्यानमाला<br>त्रिपुराविश्वविद्यालये सङ्गोष्ठी, मणिपुरे गीतगोविन्दमहोत्सवः |

## संस्थानविदुषां क्रियाकलापाः

- **आचार्यः अतुलकुमारनन्दः** (पुरी) - तिरुपतिस्थ-रा.सं. विद्यापीठेन जनवरीमासस्य ४, ५, ६ दिनाङ्केषु 'षोडशसंस्कारः' इति विषये आयोजितसङ्गोष्ठ्यां भागं गृहीत्वा "कर्णवेधसंस्कारः" इति शीर्षकाङ्कितनिबन्धमुपास्थापयत्।
- **आचार्यः खगेश्वरमिश्रः** (पुरी) - श्री जगन्नाथसंस्कृतविश्वविद्यालये फेब्रवरीमासस्य १९ तः २४ पर्यन्तं धर्मशास्त्रविभागस्य Visitng Fellow रूपेण छात्रान् अध्यापयत्।
- **डा.के.वि.सोमयाजुलुः** (पुरी) - श्री जगन्नाथसंस्कृत- विश्वविद्यालये मार्च-मासस्य २६-२७-दिनाङ्कयोः व्याकरणविभागेन आयोजितायां राज्यस्तरीयसङ्गोष्ठ्यां भागं गृहीत्वा "व्याकरणस्य दर्शनत्वसिद्धिः" इति शीर्षकाङ्कितनिबन्धम् उपास्थापयत्।
- **डा. ललितकुमारसाहुः** (पुरी) - तिरुपतिस्थ-रा.सं. विद्यापीठेन जनवरीमासस्य ४,५,६-दिनाङ्केषु "षोडशसंस्कारः" इति विषये आयोजितायां राष्ट्रियगोष्ठ्यां भागं गृहीत्वा "चतुर्वेदव्रतम्" इति शीर्षकाङ्कितनिबन्धमुपास्थापयत्। पुरीपरिसरस्यधर्मशास्त्रविभागस्य उपाचार्यस्य डा.ललितकुमारसाहोः तदीयक्षेत्रे विशिष्टावदाननिमित्तं नवदेहल्यां विद्यमाना Friendship Forum of India इत्याख्या संस्था भारतस्य विशिष्टविद्वान् इति उद्घोष्य सुवर्णपदकेन तं साभाजयत्।
- **डा. सुकान्तकुमारसेनापतिः** (पुरी) - श्री जगन्नाथसंस्कृतविश्वविद्यालये मार्च-मासस्य २८-२९-दिनाङ्कयोः सर्वदर्शनविभागेन आयोजितायां राज्यस्तरीयसङ्गोष्ठ्यां "विश्वशान्तिप्रतिष्ठा स्यात् सर्वत्र आत्मदर्शनात्" इति विषयं, ३०-३१ दिनाङ्कयोः न्यायविभागेन आयोजितायां राज्यस्तरीयसङ्गोष्ठ्यां "शास्त्रेषु पुनर्जन्मविवेकः" इति च विषयं प्रास्तौत्।
- **डा. प्रभातकुमारमहापात्रः** (पुरी) - तिरुपतिस्थ-रा.सं. विद्यापीठेन जनवरीमासस्य ४,५,६-दिनाङ्केषु "षोडशसंस्कारः" इति विषये आयोजितायां राष्ट्रियगोष्ठ्यां भागं गृहीत्वा "आधुनिककाले मुहूर्तनिर्णयावसरे ज्योतिर्विदां समस्या" इत्यमुं निबन्धमुपास्थापयत्।
- **डा. रमाकान्तमिश्रः** (पुरी) जयपुरपरिसरे फेब्रवरी-मासस्य ०८ तः १२-दिनाङ्कपर्यन्तम् आयोजितायां e-text प्रशिक्षणकार्यक्रमे भागमवहत्।
- **डा. गोविन्दपाण्डेयः** (पुरी) - श्रीजगन्नाथसंस्कृतविश्वविद्यालये फेब्रवरीमासस्य १६-१७-दिनाङ्कयोः वेदान्तविभागेन आयोजितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा "उपनिषदां प्रविभागः" इति शीर्षकाङ्कितनिबन्धमुपास्थापयत्।
- **डा. महेशझा** (पुरी) - श्रीजगन्नाथसंस्कृतविश्वविद्यालये फेब्रवरीमासस्य २०-२१-दिनाङ्कयोः न्यायविभागेन आयोजितायां राज्यस्तरीयसङ्गोष्ठ्यां भागं गृहीत्वा "न्यायवैशेषिकदर्शनयोः ईश्वरचर्चा" इति शीर्षकाङ्कितनिबन्धमुपास्थापयत्।
- **डा. रत्नमोहनझाः** (मुख्यालयः) तिरुपतौ २-६-२०१० तः ४-६-२०१० पर्यन्तम् प्रवृत्ते अखिलभारतीयप्राच्यविद्यासम्मेलने साहित्यविषये शोधपत्रं प्रास्तौत्।
- **कु. वेङ्कटेशमूर्तिः** - नवदेहल्यां श्री.ला.ब.शा.रा.सं.विद्यापीठस्य भारतीयदार्शनिकानुसन्धानपरिषदश्च संयुक्तप्रयासेन २२-३-१० तः ३१-३-१० पर्यन्तम् आयोजितायां वेदान्तपरिभाषाशिखामणि-प्रत्यक्षपरिच्छेदकार्यशालायां भागं गृहीतवान्।

ज.ने.विश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रेण मस्सचुसेटस् विश्वविद्यालयस्य (अमेरिका) इण्डिक्-अध्ययनकेन्द्रेण च सम्भूय देहल्यां जनवरी १० दिनाङ्के समायोजितायाम् 'विज्ञानम्, प्रौद्योगिकी, प्राचीनभारतीयग्रन्थाश्च' इति विषयिणाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां भागमगृह्णात्।

## कनिष्ठ-शोधवृत्तिम् (J. R. F.) अलभन्त

संस्थानपरिसरे अधीतवन्तः/शोधकार्यं कुर्वाणाः इमे छात्राः विश्वविद्यालय-अनुदान-आयोगेन आयोजितां राष्ट्रियार्हतापरीक्षां समुत्तीर्य कनिष्ठ-शोधवृत्तिम् (J.R.F.) अलभन्त-



- **श्रीप्रियव्रतमिश्रः** (शृङ्गेरीपरिसरस्य)
  शोधविषयः- पाणिनीयशब्दानुशासन- हेमचन्द्रशब्दानुशासनयोः तौलनिकं विमर्शात्मकं चाध्ययनम्



- **श्रीविनायकरजतः** (शृङ्गेरीपरिसरस्य)
  शोधविषयः-पाणिनीयाष्टाध्यायीमाश्रित्य तद्धितान्तशब्दानां निष्पादनाय तन्त्रांशनिर्माणप्रयासः।



- **श्रीभानुशर्मा** (गरलीपरिसरस्य)
  शोधविषयः- वैयाकरणसिद्धान्तकौमद्याः सिद्धान्तरत्नटीकायाः कारकप्रकरणस्य समीक्षात्मकमध्ययनम्।


### मनोरमा-पुरस्कारभाजः छात्राः

०२-१-२०१०तमे दिनाङ्के गुजरातराज्ये अहमदाबादनगरे संस्कृतभारत्या आयोजितां न्याय-शलाकापरीक्षां समुत्तीर्य, शृङ्गेरीपरिसरस्य कु.सुजाता भट्टः (शा.तृ.व.), श्री राघवेन्द्र-आरोल्ली (शा.तृ.व.), श्री सन्दीपकानेटकरः (शा.तृ.व.) च मनोरमा-पुरस्कारभाजः अभूवन्।

## २००९-१० सत्रे सर्वाधिकाङ्कान् प्राप्तवन्तः इमे छात्राः भृशम् अभिनन्द्यन्ते-

**आचार्यपरीक्षासु**

| | | |
|---|---|---|
| नव्यव्याकरणे | - | सौम्या के.आर्. (शृङ्गेरी) |
| प्राचीनव्याकरणे | - | दिनेशकुमारः (लखनऊ) |
| साहित्ये | - | कमलकान्त-बलनः (जयपुरम्) |
| सि.ज्यौतिषे | - | सुबोधकुमारपाण्डेयः (रामजी-मे.आ.सं.म.वि.) |
| फ.ज्यौतिषे | - | ज्ञानेन्द्रपाण्डेयः (आर्.पद्मावती, वारा.) |
| सर्वदर्शने | - | कमलसिंहः (जम्मू) |
| धर्मशास्त्रे | - | सुव्रतकुमारपाणिः (पुरी) |
| पुराणेतिहासे | - | रश्मितासाहुः (पुरी) |
| शुक्लयजुर्वेदे | - | दुर्गेशकुमारमिश्रः (लगमा) |
| पौरोहित्ये | - | गुरुमयूम-डि.शर्मा (राधामाधव.आ.सं.वि.) |
| रामानन्दवेदान्ते | - | वज्राङ्गी बलिः दूबे (आर्.रामानन्द) |
| जैनदर्शने | - | राजेशकुमारवर्मा (जयपुरम्) |
| बौद्धदर्शने | - | सोनलसिंहः (लखनऊ) |
| नव्यन्याये | - | मानस-मुजुमदारः (सीताराम वै. कोलकाता) |
| साङ्ख्ययोगे | - | गीताञ्जलिसाहुः (पुरी) |
| मीमांसायाम् | - | नवनीतभट्टः (शृङ्गेरी) |
| अद्वैतवेदान्ते | - | टी.सीतारामशर्मा (शृङ्गेरी) |
| **शिक्षाचार्ये** | - | राकेशकुमारजैनः (जयपुरम्) |
| **शिक्षाशास्त्रे** | - | रश्मी डोगरे जि.एन्. (शृङ्गेरी) |
| **शास्त्रिपरीक्षायाम्** | - | आशिषवशिष्ठः (जयपुरम्) |
| **उत्तरमध्यमा** (द्वि.व.) | - | गोपालपाणिग्राही (श्रीरामकृष्णमठः, बेलूरु) |
| **प्राक्शास्त्री** (द्वि.व.) | - | सुब्रह्मण्यहोल्लः (शृङ्गेरी) |
| **पूर्वमध्यमा** (द्वि.व.) | - | सुब्रतगयेनः (श्रीरामकृष्णमठः, बेलूरु) |
| **प्रथमा** (तृ.व.) | - | सुरेशराणी (लजाराम-सं.म.वि.) |





तिरुपतौ छात्रप्रातिभसमारोहे पुरस्कारं प्राप्नुवत्यौ पुरीपरिसरच्छात्र्यौ

### शृङ्गेरीपरिसरस्य इमे छात्राः श्री-आदिचुञ्चनगिरिक्षेत्रे सम्पन्ने संस्कृतोत्सवे पुरस्कारान् प्राप्नुवन्-

| | | |
|---|---|---|
| श्री प्रसन्नभट्टः (आ.द्वि.व.) | - | अलङ्कारशास्त्रभाषणे प्रथमपुरस्कारः |
| कुमारी सुजाता भट्टः (शा.तृ.व.) | - | अन्त्याक्षर्यां तृतीयपुरस्कारः |
| कुमारी शिल्पा (आ.द्वि.व.) | - | निबन्धलेखने द्वितीयपुरस्कारः |
| कुमारी पूर्णिमा (शि.शा) | - | निबन्धलेखने द्वितीयपुरस्कारः |

# छात्रप्रातिभम्



### पुरस्कृतः लखनऊ- परिसरच्छात्रः

लखनऊ-नगरस्थया अन्ताराष्ट्रिय-बौद्ध-शोधसंस्थान- नामिकया संस्थया बौद्धधर्म-दर्शनं पर्यावरणं च इति विषयमधिकृत्य आयोजितायां प्रतियोगितायां लखनऊ-परिसरस्य प्राक्शास्त्रि-द्वितीयवर्षच्छात्रः द्वितीयपुरस्काररूपेण त्रिसहस्रं रूप्यकाणि प्रमाणपत्रं च प्राप्नोत्।

### तिरुपतौ छात्रप्रातिभसमारोहे पुरस्कृताः छात्राः

तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठेन आयोजिते छात्रप्रातिभसमारोहे श्रीसदाशिवपरिसरस्य, शृङ्गेरीस्थ-रा.गा.परिसरस्य च छात्राः भागं गृहीत्वा सुवर्ण-रजत-कांस्यपदकानि सम्प्राप्नुवन्। प्राप्तपदकानां सूची इत्थमस्ति-

**सुवर्णपदकम्-**

| | | |
|---|---|---|
| साहित्ये | - | सुश्रीः लिप्सामोनालिसामिश्रः (पुरी) |
| व्याकरणे | - | सुश्रीः कुमुदाराव् (शृङ्गेरी) |
| धर्मशास्त्रे | - | सुश्रीः पङ्कजिनी आचार्यः (पुरी) |
| सङ्गीते | - | सुश्रीः सङ्गीता महाराणा (पुरी) |
| प्रश्नमञ्चे | - | सुश्रीः कुमुदाराव्, सुश्रीः सौम्या (शृङ्गेरी) |

**रजतपदकम्-**

| | | |
|---|---|---|
| ज्योतिषे | - | श्री शशाङ्कशेखरनायकः (पुरी) |

**कांस्यपदकम्-**

| | | |
|---|---|---|
| सांख्ययोगे | - | श्री राधाकृष्णपण्डा (पुरी) |
| धर्मशास्त्रे | - | सुश्रीः सरोजिनी पाणिग्राही (पुरी) |

यस्मिन् जीवति जीवन्ति बहवः सोऽत्र जीवतु।
काकाः किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम्।।
सु.र.भा. १०२.६

दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव।
विवर्जयति मेधावी तस्मिन् मैत्री प्रणश्यति।।
विदुर. ७.४८

रविवार
भोपाल, 17 जनवरी, 2010

पेज- 21

# संस्कृति की रक्षा के लिए संस्कृत जरूरी

रिपोर्टर

भोपाल। राष्ट्रीय संस्कृत संस्थान का वार्षिकोत्सव एनटीटीटीआर में मनाया गया। मानव संसाधन विकास मंत्रालय, भारत सरकार द्वारा संचालित राष्ट्रीय संस्कृत संस्थान के इस कार्यक्रम का शुभारंभ दीप प्रज्वलन से हुआ।

संस्थान के प्राचार्य प्रो. आजाद मिश्र ने परिसर की उपलब्धियों के साथ वार्षिक प्रतिवेदन प्रस्तुत किया। इस अवसर पर मुख्य अतिथि के रूप में राष्ट्रीय संस्कृत संस्थान के कुलपति प्रो. राधावल्लभ त्रिपाठी मौजूद थे। उन्होंने कहा कि मध्य प्रदेश में संस्कृत भषा के प्रचार प्रसार हेतु संस्थान के भोपाल परिसर द्वारा प्रशंसनीय कार्य किए गए हैं। इस अवसर पर संस्थान की वार्षिक पत्रिका 'राष्ट्री' का लोकार्पण मुख्य अतिथि ने किया।

संस्थान के व्याकरण विभाग के छात्र-छात्राओं द्वारा प्रस्तुत शास्त्रार्थ से प्राचीन गुरुकुल की परम्परा सजीव ... उठी। इस अवसर पर वि... वार्षिकोत्सव प्रतियोगिताओं में सफल प्रतिभागियों को पुरस्कृत किया गया। प्रख्यात संस्कृत विद्वान आचार्य श्रीनिवास रथ ने कहा कि भारतीय संस्कृति एवं सभ्यता की रक्षा के लिए संस्कृत ... आवश्यक है।

# সংস্কৃত না জানলে দেশের ঐতিহ্য জানা যায় না- কলিয়াচক সংস্কৃত মহাবিদ্যালয়




কলিয়াচক বিক্রম কিশোর আদর্শ সংস্কৃত মহাবিদ্যালয়ের গৃহ ও মূর্তি ... অনুষ্ঠান ছবি- চন্দন দত্ত

১ ফেব্রুয়ারী ঃ কলিয়াচক বিক্রম কিশোর আদর্শ সংস্কৃত মহাবিদ্যালয়ের অন্যতম ভূমি দাতা প্রয়াত বিক্রম কিশোর ... প্রতিষ্ঠা এবং ... মহা... এই হলঘরের উ... নীতীশ ... দেশের ঐতিহ্যকে জানা যায় ... প্রাচীন সংস্কৃতিকে জানা ... এবং দেশের প্রতি ... ড়ে না। সংস্কৃত ... ফিরিয়ে আনার ... র দেওয়ার ... জানান ... পাড়ে

# शिक्षण में स्वामी विवेकानंद की सोच अपनाएं

गोष्ठी का आयोजन



फोटो-नवज्योति

# संस्कृत के क्षेत्र में क...



जनकपुरी स्थित राष्ट्रीय संस्कृत संस्थान में विद्वत ... सत्यव्रत शास्त्री एवं राष्ट्रीय सांप्रदायिक सद्भावना ... देकर अभिनंदन करते संस्था के कुलपति राधा ...

पश्चिमी दिल्ली, जागरण संवाददाता : जन... स्थित राष्ट्रीय संस्कृत संस्थान ने इस वर्ष पद्मश्री ... सम्मानित संस्कृत विद्वान आचार्य रमारंजन मुखर्जी, पद्मभूषण से सम्मानित प्रो. सत्यव्रत शास्त्री व राष्ट्रीय सांप्रदायिकता सद्भावना पुरस्कार से ... तरफ से शाल ... किया गया। कार्यक्रम की ... विकास मंत्रालय में सं...

# शशिपाल शर्मा के ग्रंथ का लोकार्पण




नई दिल्ली। 'देववाणी-परिषद्, दिल्ली' द्वारा राष्ट्रिय संस्कृत संस्थान के सहयोग से आयोजित 'ग्रंथ लोकार्पणोत्सव' में परिषद् के सदस्य श्री शशिपाल शर्मा 'बालमित्र' के ग्रंथ 'जयदेवरचितं गीतगोविन्दं हिन्दी पद्यानुवाद' का लोकार्पण करते हुए संस्थान के कुलपति प्रो. राधावल्लभ त्रिपाठी ने कहा कि भक्तकवि जयदेव कृत 'गीतगोविन्द' संस्कृत की एक प्रवर्तक रचना है जिसके आधार पर इसकी शैली में अनेक रचनाएं लिखी ...

# दुर्लभ ग्रंथों के रख रखाव व प्रकाशन में जुटा है राष्ट्रीय संस्कृत संस्थान – त्रिपाठी

जनसत्ता ब्यूरो

नई दिल्ली, 28 अप्रैल। 'दुर्लभ ग्रंथों के रख-रखाव व प्रकाशन में भी जुटा है राष्ट्रीय संस्कृत संस्थान।' यह कहना है संस्थान के कुलपति डा राधा वल्लभ त्रिपाठी का। उन्होंने जानकारी दी कि 'अभी हाल उन्हें सतरहवीं सदी की एक पुस्तक 'नाट्य प्रदीप' मिली। ... के रचनाकार हैं सुंदरराज। इसी तरह उन्हें ... ज्ञान भैषज मंजरी ... लिपि ... करते हुए डा. त्रिपाठी ने कहा कि इससे राजकीय आदेशों, अधिसूचनाओं वगैरह का संस्कृत में अनुवाद के लिए अनुवादकों की जरूरत पड़ेगी। क्योंकि रेडियो व टीवी पर संस्कृत बुलेटिनों और संस्थान के प्रयास से देश में इस भाषा के प्रति उत्साह बढ़ा है। पूरे देश के अलग-अलग राज्यों के जिलों में संस्कृत पढ़ने वालों की तादाद भी बढ़ी है।

संस्कृत-हिंदी भाषा साहित्य पर अच्छी पकड़ रखने वाले अध्येता व कवि-लेखक डा. त्रिपाठी ...ा देश में कर्नाटक के बंगलुरू के गांव ...और मप्र के राजगढ़ जिले के झिरी गांव में संस्कृत में ही बातचीत करते हैं। उन्होंने ... के संस्कृत के व्यावहारिक प्रयोग में संस्कृत ... और हिंदू सेवा समिति जैसी स्वयंसेवी ...ाएं खासा अच्छा काम कर रही हैं।

इस दिशा में राष्ट्रीय संस्कृत संस्थान ने पूरे ... में अपने कुल दस परिसर के जरिए खासा ...म किया है। इसके अलावा विभिन्न स्कूल ... कालेज में एक हजार केंद्र खोले हैं जहां ...च्चे संस्कृत के ही माहौल में सुविधा से रहते हैं और संस्कृत सीखते हुए उसे बोलचाल की भाषा में ढालने की कोशिश करते हैं। इस प्रयोग से डेढ़ लाख लोगों को लाभ हुआ है।

डा. त्रिपाठी ने दो साल में संस्थान की तिमाही पत्रिका संस्कृत वार्ता को इतना सहज बना दिया है कि हिंदी पढ़ने वाले बड़ी ही सहजता से उसे पढ़ और समझ सकते हैं। उन्होंने कहा, संस्कृत अपनी ही भाषा है इसी से ज्यादातर भाषाएं बनीं।

# राष्ट्रिय-संस्कृत-संस्थानम्

बहुपरिसरीयः बृहत्तमः मानितसंस्कृतविश्वविद्यालयः
( भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनः )
५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८

दूरस्थशिक्षाविधिना विविधपाठ्यक्रमाणां शुभारम्भः

## मुक्तस्वाध्यायपीठम्

ऐषमः शैक्षिकसत्रे प्रारप्स्यमाणाः उपाधिपाठ्यक्रमाः–

**प्राक्शास्त्री ( +२ )**
**अवधिः**-वर्षद्वयम्
**अर्हता**-ससंस्कृतं दशमकक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**सेतुपाठ्यक्रमः ( संस्कृतावतरणी )**
**( प्राक्शास्त्रिप्रवेशाय )**
**अवधिः**-षण्मासाः, **अर्हता**-विना संस्कृतं दशमकक्षोत्तीर्णता।

**शास्त्री ( बी.ए. )**
**( व्याकरणे-साहित्ये-फलितज्यौतिषे )**
**अवधिः**-वर्षत्रयम्,
**अर्हता**-प्राक्शास्त्री/उत्तरमध्यमा/इन्टरमीडियट/तत्समकक्षोत्तीर्णता।

**सेतुपाठ्यक्रमः ( संस्कृतावगाहनी )**
**शास्त्रिप्रवेशाय**
**अवधिः**-एकवर्षम्, **अर्हता**-विना संस्कृतं द्वादशकक्षोत्तीर्णता

**आचार्यः ( व्याकरणे-साहित्ये )**
**अवधिः**-वर्षद्वयम्,
**अर्हता**-ससंस्कृतं त्रिवर्षीयस्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।*

**आचार्यप्रवेशपरीक्षा** – * **विना संस्कृतं स्नातकपरीक्षायां/तत्समकक्षपरीक्षायाम् उत्तीर्णः सम्बद्धशास्त्रस्य ( व्याकरणस्य/साहित्यस्य ) प्रवेशपरीक्षाम् उत्तीर्य एव आचार्यकक्षां प्रवेष्टुमर्हति।**

**एकस्मिन् शास्त्रे शास्त्रिकक्षां/आचार्यकक्षाम् उत्तीर्णः अपरस्मिन् शास्त्रे आचार्यं पिपठिषुः ईप्सितशास्त्रे प्रवेशपरीक्षाम् उत्तीर्य नामाङ्कनं कारयितुं प्रभवति।**

**उपर्युक्तानां सन्दर्भे अधिकविवरणाय 'विवरणिका' द्रष्टव्या।**

आवेदनपत्रं/विवरणिका च संस्थानमुख्यालयात् अधोलिखितेभ्यः स्वाध्यायकेन्द्रेभ्यश्च **०१ सितम्बर, २०१०** आरभ्य प्राप्तुं शक्यते–

१. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.), ५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी, **नवदेहली**, २. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गङ्गानाथझापरिसरः, चन्द्रशेखर-आजादपार्क, इलाहाबादम् **( उत्तरप्रदेशः )** ३. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) सदाशिवपरिसरः, पुरी **( उड़ीसा )** ४. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) रणवीरपरिसरः, कोट-भलवल, जम्मू **( जम्मू-कश्मीरम् )** ५. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गुरुवायूरुपरिसरः, पुरनाट्टुकरा, त्रिचूर, **( केरलम् )** ६. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) जयपुरपरिसरः, त्रिवेणीनगरम्, गोपालपुरा बाईपास, जयपुरम् **( राजस्थानम् )** ७. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) विशालखण्डः-४, गोमतीनगरम्, लखनऊ **( उत्तरप्रदेशः )** ८. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.) राजीवगान्धीपरिसरः, शृङ्गेरी, चिकमङ्गलूरु **( कर्णाटकम् )** ९. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गरलीपरिसरः, ग्राम-गरली, ब्लॉक-परागपुर, तहसील-देहरा, जिला-काङ्गडा **( हिमाचलप्रदेशः )** १०. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) भोपालपरिसरः, संस्कृतमार्गः, बागसेवनिया, भोपालम् **( मध्यप्रदेशः )** ११. समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) क.जे.सोमैया-परिसरः, द्वितीयतलम्, एस्.आई.एम्.एस्.आर्. भवनम्, विद्याविहारः, मुम्बई **( महाराष्ट्रम् )**।

**आवेदनपत्रं विवरणिका च Director, Mukta Svadhyayapeetham, New Delhi इति नाम्ना डी.डी. प्रस्तुत्य उपर्युक्तात् कस्माच्चिदपि स्वाध्यायकेन्द्रात् प्राप्तुं शक्यते। आवेदनपत्रं संस्थानस्य विश्वव्यापिजालपुटात् (www.sanskrit.nic.in) प्राप्य अधोनिर्दिष्ट-शुल्केन सह स्वाध्यायकेन्द्रे समर्पयितुं शक्यते।**

**शुल्कविवरणम्–** साक्षात् स्वीकरिष्यते चेत् रु. ५००/-, ( अ.सू.जा./अ.सू.ज.जा./विक.- रु. २५०/- ) पत्रालयमाध्यमेन चेत् रु. ५५०/- ( अ.सू.जा./अ.सू.ज.जा./विक.- रु. ३००/- ) ०१-०९-१० तः १५-०९-१० पर्यन्तम्। विलम्बशुल्कं रु. १००/- ( १५-०९-२०१० तः ३०-०९-२०१० पर्यन्तम् )। कस्मिंश्चिद् स्वाध्यायकेन्द्रे आवेदनपत्रं प्रपूर्य समर्पणीयम्।

–निदेशकः

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.II No.7-8 Pub. by the Registrar for Rashtriya Sanrkrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007